ISSN 2456-3420

ज्ञान-विज्ञान विमुक्तये
UGC Care Listed

खगोल:

(KHAGOLAH)



Peer Reviewed Annual Research Journal of Jyotish

Vol. 03 2018

DEPARTMENT OF JYOTISH

योऽनूचानः स नो महान्।
राष्ट्रियसंस्कृतसंस्थानम्

VEDAVYAS CAMPUS
Rashtriya Sanskrit Sansthan, Balahar
Himachal Pradesh-177108
www.rsksbalahar.ac.in

ISSN 2456-3420

KHAGOLAH

PEER REVIEWED ANNUAL RESEARCH JOURNAL OF JYOTISH

VOL. 03. 2018

Co-ordinated by IQAC Vedavyas Campus, Balahar (H.P.)

Title	:	Khagolah (खगोलः)
Vol. :	:	03
Year	:	2018
ISSN	:	2456-3420
Price	:	60/-

Copy	:	300
Printed and Published by	:	Prof. L.N. Pandey, Principal Rashtriya Sanskrit Sansthan, Vedavyas Campus, Balahar, Himachal Pradesh-177108
Editor	:	Dr. P.V.B. Subrahmanyam
Email		pub.vvc@gmail.com
Website		http://www.rsksbalahar.ac.in
Fax/Phone		01970-245409
Printed at	:	Abhi Printers, F-19A, Focal Point Ext. Jalandhar-144103. 09465238137 (M)

Composed and Designed By : Ajay Sharma for Abhi Printers.

सूचनाः-प्रकाशित लेखों व शोधपत्रों से प्रकाशक का सहमत होना अनिवार्य नहीं है।

Editorial

"यः तर्केणानुसन्धत्ते स धर्मं वेद नेतरः"

Research with proper hypothesis leads to fruitful (results) outcome useful for contemporary society. Pro society thoughts and acts are applauded by Dharma Shastra. It favours quest for a reasonable solution. The mechnnism to reach solution always express a unique thought of oneness of all thoughts or the theory of every thing.

Khagola believes in universal oneness and thrives to excert the essence of all subjects to achieve the best. In its endeavors team adopts kaizen principle which resembles the Asakrit (असकृत्) method of Jyotish.

विषयसूची

ISSN 2456-3420

नाडीदोषस्य परिशीलनम्

डॉ. विष्णुकुमारनिर्मलः

भारतीयसंस्कृतौ विवाह एकः विशिष्टसंस्काररूपेण मन्यते। हिन्दूधर्म षोडशसंस्काराणां वर्णनमस्ति। तेषु विवाह संस्कारः शास्त्रं स्वेच्छया चेत्तुं (स्वीकर्तुं) अधिकारं न ददाति। तस्य कानिचन अनुशासनानि सन्ति ये उल्लङ्घनेन दम्पत्योः दाम्पत्यजीवनम् अपरिहार्यरूपेण दौर्भाग्यात् नष्टं भवति। वरकन्ययोः वैवाहिकजीवनं सुखेन, सार्थकेन समृद्धिमयेन, सरसेन, उल्लासपूर्णेन साफल्याय भारतीयज्योतिषशास्त्रे त्रीणिमुख्यानुशासनानि वर्णितानि सन्ति-१. अष्टकूटविचारः २. कुजदोषविचारः ३. विवाहकालनिर्णयः।

विवाहसंस्कारात् पूर्वमुपयुक्तानामनुशासनानां विचारः परमावश्यकः वर्तते। अतः परम् अष्टकूटानां चर्चा कर्त्तव्या-२. वर्णः २. वश्यः ३. तारा ४. योनिः ५. राशीशमैत्री ६. गणः ७. भकूटः ८. नाडी। वरवध्वोः जातकपरीक्षणविचारे नाडीदोषविचारः महत्वपूर्णोऽस्ति। अन्यकूटेभ्यः नाडीकूटाय ८ अंकाः निर्धारिताः वर्तन्ते। अस्य अनुकूलमात्रे अष्टगुणानां वृद्धिः जायते। अतः नाडीदोषशुद्धिः सर्वत्र परमावश्यकी वर्तते। अन्येषां दोषानां कदाचित् अपेक्षा स्यात् किन्तु सफलदाम्पत्यजवनाय नाडीदोषस्य उपेक्षा कदापि न कर्त्तव्या। यथोक्तम्-

नाडीकूटं तु संग्राह्य कूटानां तु शिरोमणिम्।
ब्रह्मणा कन्यकाकण्ठसूत्रत्वेन विनिर्मितम्।।

(मु. चि. ६/३४ पीयूषधाराटीकायाम्)

यथा विवाहितकन्यायाः कृते मङ्गलसूत्रमावश्यकं तथैव विवाहार्थं वरकन्ययोः नाडीदोषविचारः प्रमुखोऽस्ति। इदानीं प्रश्नः समुदेति यत् येन नाडीदोषेण वरवध्वोः दाम्पत्यजीवनं सुखमयं दुःखमयं वा सार्थकं निरर्थकं वा सामञ्जस्यपूर्णं विघटनं वा भवति, वस्तुतः सः दोषः कः? कथं वा भवति?

नाडीकूटस्य सम्बन्धः नक्षत्रैः साकं वर्तते। तेषामाधारेणैव नाडीदोषविचारः प्रमुखोऽस्ति। इदानीं प्रश्नः समुदेति यत् येन नाडीदोषेण वरवध्वोः दाम्पत्यजीवनं सुखमयं दुःखमयं वा सार्थकं निरर्थकं वा सामञ्जस्यपूर्णं विघटनं वा भवति, वस्तुतः सः दोषः कः? कथं वा भवति?

नाडीकूटस्य सम्बन्धः नक्षत्रैः साकं वर्तते। तेषामाधारेणैव नाडीचक्रस्य निर्माणं भवति। नाडीदोषः वैवाहिकसम्बन्धार्थं दुष्टः, दुःखकरो वा भवति। तदर्थमेव नाडीदोषस्य महत्त्वम् अन्यकूटेभ्यः अधिकः भवति। नाड्यः तिस्रो वर्तन्ते। आदिमध्यान्ताश्च। समाननाड्ययोः विवाहः निषिद्धः। आचार्यवराहमिहिरेणोक्तम्-

आद्यैक नाडी कुरुते वियोगं मध्याख्यनाड्यामुभयोर्विनाशम्।
अन्ते च वैधव्यमतीवदुःखं, तस्माच्च तिस्रः परिवर्जनीया।।

(वृ. दै. र. ७१/३९९)

वरकन्ययोः जन्म यदि आदिनाड्यां भवति तर्हि उभयोर्वियोगः निश्चितः। पुनः यदि वरकन्ययोः जन्म मध्यनाड्यां भवति चेत् उभयोर्मृत्युः कथितः। अन्ते यदि वरकन्ययोः जन्म भवति तदा वैधव्यं भवति। अतः तिसृणां समाननाडीनां परित्यागः करणीयः। अस्मिन् विषये महर्षिवशिष्ठस्य किञ्चिद् भिन्नं मतं वर्तते। वशिष्ठसंहितानुसारेण मध्यनाड्ययोः वैधव्यं तथा शेषनाड्ययोः कन्यायाः मृत्यु भवति। नाडीदोषे यदि वरकन्ययोः जन्मनक्षत्रयोः सामीप्यम् अस्ति चेत् विवाहानन्तरम् एकवर्षाभ्यन्तरे कन्यायाः मरणं भवति। उत वर्षत्रयाभ्यन्तरे वैधव्यं निधनं वा भवति। नाडीदोषस्य विचारः जन्मनक्षत्रानुसारेणैव कर्त्तव्यम्।

इदानीं नाडीदोषस्य वैज्ञानिकाधारस्य चर्चाऽपि आवश्यकी वर्तते। सर्वाणि नक्षत्राणि त्रिधा विभज्यन्ते। आदिमध्यान्त्यनाडीषु। तथैव वातपित्तकफानुसारेण। अर्थात् आद्यनाडी वातात्मिका, मध्यनाडी पित्तात्मिका पुनः अन्त्यनाडी कफात्मिका वर्तते। यदि वरवध्वोः वातात्मिका नाडी वर्तते चेत् विवाहानन्तरं वरवध्वोः संयोगेन वाताधिक्यं भवति तेन पत्युः हानिः जायते। एवमेव यदि उभयोः पित्तात्मिकानाडी भवति चेत् संयोगानन्तरं पित्ताधिक्यं भवति येन पत्न्याः नाशः भवति। अन्ते यदि उभयोः कफात्मिका नाडी वर्तते चेत् संयोगानन्तरं कफाधिक्यं भवति येन उभयोः मृत्युः सञ्जायते। अनेन प्रकारेण शरीरस्य क्रियाः नाडीम् अवलम्बिताः वर्तन्ते।

ISSN 2456-3420

नाडीचक्रम्

आदि	अश्विनी	आर्द्रा	पुनर्वसु	उ. फा.	हस्तः	ज्येष्ठा	मूलम्	शतभिषा	पू. भा.
मध्य	भरणी	मृगशिरा	पुष्यः	पू. फा.	चित्रा	अनुराधा	पू. षा.	धनिष्ठा	उ. भा.
अन्त्य	कृतिका	रोहिणी	आश्लेषा	मघा	स्वाती	विशाखा	उ. षा.	श्रवणः	रेवती


नाडीदोषस्य निराकरणम्

बहुषु स्थितिषु नाडीदोषपरिहारः **स्वयमेव भवति यथा-**

१. **यदि** वरवध्वोः **नक्षत्रैक्यं भवति परन्तु चरणभेदेन नाडीदोषः शमं याति।**

२. यदि वरकन्ययोः नक्षत्रैक्यं भवति परन्तु राशिभेदेनापि **नाडीदोषस्य शमनं भवति।**

३. **यदि नक्षत्रानुसारेण नाडीदोषः भवति परन्तु चरणभेदः अस्ति चेत् नाडीदोषः न भवति। यथा** अस्विनिनक्षत्रस्य तृतीयचरणं नक्षत्रस्य प्रथम चरणेन आदि नाडी भवति परन्तु चरणभेदेन नाडीदोषः न भवति। अत्र चरणवेधमपि व्यक्तव्यम्। यथा प्रथम चरणस्य चतुर्थ चरणेन सह तथा तृतीयचरणस्य द्वितीय चरणेन सह वेधः भवति।



विवाहकौतुहलग्रन्थानुसारेण वरवध्वोः राशिनक्षत्रयोः एकत्वे सति नाडीदोषः भवति, परन्तु उभयोः राशीशौ यदि शुभग्रहौ स्तः चेत् नाडीदोषशमनं भवति। नाडीदोषस्य परिहाराय महामृत्युञ्जयजपं कारयित्वा ब्राह्मणेभ्यः दानं दत्वा दीर्घायुष्यस्य आशीर्वादस्वीकरणेन शुभं भवति। यथोक्तम्-

शुक्रे जीवे तथा सौम्ये एकराशीश्वरो यदि।
नाडीदोषो न वक्तव्यः सर्वथा यत्नतो बुधैः।।

(वृ. दै. र. ७१/४४४)

कानिचन नक्षत्राणि सन्ति तेषु जन्मना वरवध्वोः नाडीदोषः न भवति। यथोक्तं ज्योतिर्निबन्धे-

विशाखिकार्द्रा श्रवण प्रजेश, तिष्यांतात्पूर्वमघाः प्रशस्ताः।
स्त्रीपुंसतारैक्यपरिग्रहे तु शेषा विवर्ज्या इति संङ्गिरन्ते।।

(मु. चि. ६/३५ पीयूषधाराटीकायाम्)

अर्थात् विशाखा-आर्द्रा-श्रवण-रोहिणी-पुष्य-भरणी-पू. भा.- मघा एतेषु कस्मिन्नपि नक्षत्रे वरकन्ययोः जन्मभवति तदा नाडीदोषः न सञ्जायते। यदि स्त्रीपुरुषयोः समानतारा भवति तदा इतोऽपि शुभं भवति। एतदतिरिच्य धनिष्ठा-विशाखा-भरणी-कृत्तिका-हस्त- आश्लेषा-पुष्य-श्रवणाः। एतेषु नक्षत्रेष्वपि वरकन्ययोः जन्मभवति तदापि नाडीदोषः स्वयमेव नष्टः भवति। वस्तुतः नाडीदोषस्य महत्त्वं सर्वाधिकं वर्तते। वरकन्ययोः जन्माङ्गे यदि नाडीदोषः निरस्तः भवति चेत् गणकूटभकूटादि दोषाः स्वयमेव विनश्यन्ति।

प्रीतिवित्तसुखदः करग्रहम्, त्वेकराशीषु च भिन्नं यदि।
वारुणाजपदभं भवेद्यदा, नाडीदोषगणजो न विद्यते।।

(वैवाहिक सुख, ज्योतिषीय संदर्भ पृ. सं.-१४२)

अर्थात् वरकन्ययोः भिन्ने नक्षत्रे तथा राश्यैक्ये सति विवाहे प्रीतिः भवति। धनधान्यं सुखञ्च भविष्यति। अस्यां स्थितौ नाडीदोषेण सह गणदोषस्यापि नाशः भवति।

अजैकपान्मित्रवसुद्विदैव, प्रभञ्जनाग्न्यर्क भुजङ्गमानि।
मुकुन्दजीवान्तक भानि नूनं, शुभानि योषिन्नरजन्मभैक्ये।

(वैवाहिक सुख ज्योतिषीय संदर्भ पृ. सं.-१४३)

अर्थात् पू. भा.-अनुराधा-धनिष्ठा-विशाखा-भरणी-कृत्तिका- हस्त-आश्लेषा-पुष्य-श्रवण एतेषु कस्मिन्नपि नक्षत्रे वरकन्ययोः जन्म स्यात्तर्हि नाडीदोषः न भवति। अभिप्रायः अयं वर्तते यत् निम्नलिखितेषु यदि वरवध्वोः जन्म भवति तर्हि नाडीदोषः न भवति। यथा-१. अश्विनी २. कृत्तिका ३. रोहिणी ४. मृगशिरा ५. आर्द्रा ६. पुष्यः ७. मघा ८. विशाखा ९. अनुराधा १०. श्रवणाः ११. धनिष्ठा १२. पूर्वाभाद्रपदः १३. उत्तराभाद्रप्रदः १४. रेवती।

अर्थात् यदि वरकन्ययोः उपर्युक्तचतुर्दशनक्षत्रेषु किमपि एकं नक्षत्रं स्यात् तर्हि नाडीदोषः न प्रभवति। यदि एषु चतुर्दशनक्षत्रेषु भिन्न-भिन्न नक्षत्रे स्यातां तर्हि नाडीदोषनिरस्तकरणं न भविष्यति इति।

अतः परं यदि वरकन्ययोः जन्माङ्गे नाडीदोषः केनापि प्रकारेण निरस्तः न भवति तदा निम्नांकितविधिभिः नाडीदोषस्य शमनं कुर्यात्-

अथैकनाडीयुजिगो स्वर्णादितत्वोद्वहेत्।
गावोऽन्नं वसनं हेमं सर्वदोषापहारकम्।। (मुहूर्त्तमार्तण्ड)

अर्थात् नाडीदोषे सति स्वर्णदानं कर्त्तव्यम्। वस्तुतः गौ-वस्त्र-

स्वर्ण-अन्नादि दानेनापि दोषशमनं भवति। मृत्युञ्जयजपः स्वर्णस्य सर्पाकृतिं निर्माय प्राणप्रतिष्ठां कृत्वा दानदक्षिणादि प्रदानेन नाडीदोषः शम्यते।

यथा पीयूषधारायाम्-

दोषापनुत्तये नाड्यां मृत्युञ्जयजपादिकम्। विधाय-ब्राह्मणांश्चैव तर्पयेत्काञ्चनादिना।।

हिरण्मयीं दक्षिणां च दद्याद्वर्णादिकूटके। गावोऽन्नं वसनं हेमं सर्वदोषापहारकम्।।

(मु. चि. ६/३४ पीयूषधाराटीकायाम्)

उपसंहारः-

निष्कर्षरूपेण कथ्यते यत् वरकन्ययोः जन्माङ्गे नाडीदोषे सति विवाहस्यानुमतिः न दीयते, शास्त्रसम्मतमपि नास्ति। अनेकेभिः ऋषिभिः उक्तं यत् नाडीदोषयुक्तविवाहः बहुघातकः भवति। अपि च तयोः एकस्य मृत्युः अपि शीघ्रं भवति अथवा तयोः वैवाहिजीवनं बहुकष्टकरं भवति अथवा सन्ततेरभावः अपि भवितुं शक्नोति अथवा अयोग्यसन्तत्या जीवनं दुःखमयं भवति। एतदतिरिच्य यदि वरवध्वोः नक्षत्रमेलापकस्य अभावः वर्तते तदा ग्रहमेलापकं यदि सुदृढं वर्तते चेत् विवाहः कर्तुं शक्यते।

सन्दर्भग्रन्थाः

१. मुहूर्त्तचिन्तामणिः, पीयूषधाराटीका, (विन्ध्येश्वरप्रसाद द्विवेदी) चौखम्भा सुरभारती प्रकाशन, वाराणसी।

२. वृहद्दैवज्ञरञ्जनम्।

३. वैवाहिक सुख, ज्योतिषीय संदर्भ पृ. सं.-१४२।

४. विवाह मेलापक विचार (डॉ. राजकुमार द्विवेदी), अमर ग्रन्थ पब्लिकेशन, दिल्ली), अमर ग्रन्थ पब्लिकेशन, दिल्ली।

५. मांगलिक मेलापक विचार (डॉ. रामनिहोर राय), मनीष प्रकाशन, वाराणसी।

डॉ. विष्णुकुमारनिर्मलः, सहायकाचार्यः (ज्योतिषविभागः)

राष्ट्रियसंस्कृतसंस्थानम्, वेदव्यासपरिसरः, बलाहरः, काँगडा, हि.प्र.

ISSN 2456-3420

ग्रहस्पष्टीकरणार्थं गणितीयसिद्धान्तानां विवेचनम्

डॉ. हरिनारायणधरद्विवेदी

सिद्धान्तः-ज्योतींषि प्रतिपाद्यन्ते यस्मिन्नित्यर्थे 'अर्श आदिभ्योऽच्'[1] इति सूत्रेण निष्पन्नः ज्योतिः शब्दः। शास्त्रोऽयं ज्योतिर्जुषां सूर्याद्याकाशीयपिण्डानां **बोधकोऽस्ति**। ग्रहनक्षत्रताराधूमकेत्वादीनां स्थिति-गति-परिभ्रमणकालादीनां निरूपणम्, कालस्य भेदानां वर्णनम्, यज्ञादीनां सम्पादनाय कालस्य निर्धारणञ्च यत्र भवति तदेवास्ति ज्योतिषशास्त्रम्। शास्त्रोमिदं वेदस्य नेत्राङ्गत्वेन स्वीकृतमस्ति।

उक्तं चापि-

वेदचक्षुः किलेदं स्मृतं ज्यौतिषम्।।[2]

ज्योतिःशास्त्रं हि कालविधानशास्त्रमस्य प्रतिपाद्यविषयोऽपि काल एव। सामान्यतो ज्योतिषेव सिद्धान्तसंहिताहोरा-भेदेन त्रिस्कन्धमुच्यते। तद्यथा-

सिद्धान्तसंहिताहोरारूपस्कन्धत्रयात्मकम्।
वेदस्य निर्मलं चक्षुज्योतिश्शास्त्रमनुत्तमम्।।[3]

कुत्रचित् केरलिः शकुनश्चेति दौ भेदौ संयोज्येदं पञ्चस्कन्धमप्युज्यते। तथोक्तम्-

पञ्चस्कन्धमिदं शास्त्रं होरागणितसंहिताः।
केरलिः शकुनश्चैव ज्यौतिशास्त्रामुदीरितम्।।[4]

परं भारतीयज्यौतिःशास्त्रं मुख्यतः सिद्धान्त-होरा-संहितास्कन्धत्रयात्मकमस्तीति वराहमिहिरेणापि बृहत्संहितायां स्वीकृतमस्ति। सिद्धान्तस्कन्धमेव ज्ञायते।

स्कन्धेऽस्मिन् त्रुट्यादितः कल्पपर्यन्तं कालगणना, सौरसावनचान्द्रादिमासानां प्रतिपादनं, ग्रहगतीनां निरुपणम्, व्यक्ताव्यक्तगणितस्य **प्रयोजनम्**, प्रश्नोत्तरविधिः, ग्रहनक्षत्राणां स्थितिः, विविधाः तुरीयनलिकादियन्त्राणां निर्माणविधिः, दिग्देशकालानां निरुपणम्, **अक्षक्षेत्रसम्बन्धी** अक्षज्या, लम्बज्या, द्युज्या, कुज्या, तद्धृतिः समशङ्क्वादीनामानयनम्, ग्रहणयोः प्रतिपादनं विशदतया प्राप्यते। सिद्धान्तशब्दो गणितवाचकोऽस्तीति प्रसंगेऽस्मिन् भास्करेण निगदितं यत्-

त्रुट्यादि प्रलयान्तकालकलना मानप्रभेदः क्रमा।
श्चारश्च द्युसदां द्विधा च गणितं प्रश्नास्तथा सोत्तराः।।
भूधिष्ण्यग्रहसंस्थितेश्च कथनं यन्त्रादि यत्रोच्यते
सिद्धान्तः स उदाहृतोऽत्र गणितस्कन्धप्रबन्धे बुधैः।।[5]

प्राचीनकाले अङ्कगणितमाध्यमेनैवाहर्गणस्य साधनं कृत्वा ग्रहाणामानयनं ज्योतिश्शास्त्रस्य प्रतिपाद्यविषयमासीत्। पूर्वमध्यकालेऽस्याः परिभाषायाः तेनैव रूपेण स्वीकृतमासीत्। 1000 ईस्वीतः 1600 ईस्वीपर्यन्तं बहवः नूतनाः विषयाः शास्त्रेऽस्मिन् समागताः। कालेऽस्मिन् वासनात्मकपद्धत्या व्यक्तगणितमाध्यमेनाह-र्गणस्य साधनं विधाय ग्रहाणामानयनं क्रियते स्म। अतः कालेऽस्मिन् गणितः सिद्धान्त-तन्त्र-करणेषु त्रिषु विभागेषु सिद्धान्तोऽयं दृश्यते।

सिद्धान्तः-येषु ज्योतिषग्रन्थेषु ग्रहाणामानयनं कल्पादितो अभीष्टदिनं यावद्भवति ते सिद्धान्तग्रन्थवाच्याः भवन्ति।

उक्तं चापि-

सृष्ट्यादेर्यद् ग्रहज्ञानं सिद्धान्तः स उदाहृतः।।[6]

सिद्धान्तग्रन्थेषु ब्रह्मस्फुटसिद्धान्तः, सिद्धान्तशिरोमणिः, पञ्चसिद्धान्तिका, सिद्धान्तसार्वभौमः, सिद्धान्ततत्त्वविवेकः, सिद्धान्तशेखरः सूर्यसिद्धान्तस्य प्रमुखाः सन्ति। तदतिरिक्तं रोमकसिद्धान्तपौलिशसिद्धान्ताद्यष्टादशसिद्धान्तग्रन्थानां[7] नामानि उपलब्धानि भवन्ति, परं ते ग्रन्थाः वर्तमानकाले लुप्ताः सन्ति।

तन्त्रशास्त्रम्-येषु ज्योतिषग्रन्थेषु युगादितोऽभीष्टदिनं यावद् ग्रहाणामानयनं भवति ते तन्त्रग्रन्थनाम्ना प्रसिद्धाः सन्ति। तन्त्रग्रन्थेषु वटेश्वरसिद्धान्तः, सूर्यसिद्धान्तः, आर्यभट्टीयम्, शिष्यधीवृद्धिः, आदयः प्रमुखाः सन्ति।

करणग्रन्थाः-ज्योतिश्शास्त्ररस्य येषु ग्रन्थेष्वभीष्टशकादेः इष्टदिनपर्यन्तं ग्रहाणामानयनं भवति ते करणग्रन्थनाम्ना प्रसिद्धाः सन्ति। तद्यथा-

शकाद्यत्र ग्रहज्ञानं करणं तत् प्रकीर्तितम्।।[8]

करणप्रकाशः, करणकुतूहलम्, ग्रहकौतुकम्, खण्डखाद्यम्, ग्रहलाघवमित्यादयः लघुभास्करीयं प्रमुखाः करणग्रन्थाः सन्ति। वर्तमानकाले बहुषु स्थलेषु करणग्रन्थानामाधारेणैव पञ्चाङ्गेषु ग्रहगणितस्य

ISSN 2456-3420

सम्पादनं क्रियते। एषु त्रिषु स्कन्धेषु तन्त्रं हि सिद्धान्तापरपर्यायम्। इदं हि गणितशब्देनाप्यभिधीयते, तन्त्रं हि ग्रहगणितसम्बद्धम्। मध्यगतिः, तिथिनक्षत्रच्छेदः स्फुटगतिः, त्रिप्रश्नाः, चन्द्रार्कग्रहणम्, उदयास्तमयौ, शृङ्गोन्नतिः, समागमः, ताराग्रहसंयोगश्च तन्त्रस्य विवेच्यविषयाः। ग्रहगतिसाधने ग्रहाणां वक्रत्वमनुवक्रत्वञ्च विवेच्यते। सिद्धान्तग्रन्थेष्वपि ज्योतिषशास्त्रस्य विषयाणां प्रतिपादनाय, मध्यमाधिकारः, स्पष्टाधिकारः, त्रिप्रश्नाधिकारः, चन्द्रग्रहणाधिकारः, सूर्यग्रहणाधिकारः, ग्रहोदयास्ताधिकारः, शृङ्गोन्नत्यधिकारः पाताधिकारः, भूगोलाध्यायश्च निरुपितोऽस्ति। एष्वेवाधिकारेषु सिद्धान्तस्य सर्वेऽपि विषयाः विवेचिताः सन्ति।

भारतीयज्योतिषशास्त्रे आकाशे ग्रहाणां दर्शनात्पूर्वं गणितीयपद्धत्या तेषामाकाशीयस्थितेः ज्ञानं क्रियते। आकाशीयस्थितेः ज्ञानार्थं ये गणितसिद्धान्ताः प्रतिपादिताः सन्ति तेषु केचन् यथावत् केचन च परिष्कृतरूपेण वर्तमानगणितशास्त्रे बहुप्रथिताः सन्ति। वर्तमानकालेऽपि बहुषु स्थलेषु गणितीय समस्यानां समाधाने तेषां प्रयोगः क्रियते। एवं ग्रहगणितं साधनाय दशाङ्कपद्धतेः, शून्यस्य, योगस्य (+), वियोगस्य (-), गुणनपद्धतेः (×) , विभाजनपद्धते (/), वर्गस्य, वर्गमूलस्य, घनस्य, घनफलस्य, त्रैराशिकानुपातस्य, पञ्चराशिकानुपातस्य, कुट्टकगणितस्य, वृत्तेव्यासपरिधिसम्बन्धस्य, त्रिभुजक्षेत्रफलस्य, घनक्षेत्रफलस्य, आयतस्य, शङ्कोर्घनफलस्य, त्रिकोणमित्तौ ज्यासाधनस्य, उत्क्रमज्यासाधनस्य, तेषां सारण्यादीनाञ्च प्रयोगः ज्योतिषशास्त्रे वर्णितमस्ति।

एषां सर्वेषामपि गणितीयविषयाणां समस्तेऽपि सिद्धान्तज्योतिषे प्रायः प्रतिपदं प्रयोजनं भवति।

मध्यग्रहसाधनम्-

सृष्ट्यादितः वर्तमान यावद् ग्रहसाधनाय ग्रहाणां पूर्वमतेः भगणाः, मन्दशीघ्रोच्चभगणाः पातभगणाश्च प्रतिपादिताः सन्ति। वर्षपति-मासपति-वारेशादीनाञ्च साधनं भवति।

मध्यग्रह आनयितुम् अहर्गणस्य आवश्यकता भवति। अहर्गणविषये विविध सिद्धान्तग्रन्थेषु वर्णनं प्राप्यते।

यथोक्तं सूर्यसिद्धान्ते-

अत ऊर्ध्वममी युक्ता गतकालाब्दसङ्ख्या।
मासीकृता युता मासैर्मधुशुक्लादिभिर्गतैः।।48।।
पृथकस्थास्तेऽधिमासघ्नाः सूर्यमासविभाजिताः।
लब्धाधिमासकैर्युक्ता **दिनीकृत्य दिनान्विताः** ।।49।।
द्विघ्नास्तिथिक्षयाभ्यस्ताश्चान्द्रवासरभाजिताः।
लब्धोनरात्रिरहिता लङ्कायामार्धरात्रिकः।।50।।
सावनो द्युगणः सूर्याद्दिनमासाब्दपास्ततः।
सप्तभिः क्षयितः शेषः सूर्याद्यो वासरेश्वरः।।51।।[9]

अहर्गणविधिः-

सृष्ट्यादिगताब्दाः × 12 + गतमासः = इष्टादिसौरमासाः

इष्टादिसौरमासाः × युगाधिमासाः = इष्टाधिमासाः (लब्धि)

युगादिसौरमासाः

इष्टादिसौरमासाः + इष्टाधिमासाः = इष्टचान्द्रमासाः

इष्टचान्द्रमासाः × 30 = चान्द्रतिथयः

चान्द्रतिथयः + गततिथयः(शुक्लादि) = गतचान्द्रतिथयः

$$\frac{\text{गतचान्द्रतिथयः} \times \text{युगक्षयतिथयः}}{\text{युगचान्द्रतिथयः}} = \text{इष्टक्षयतिथयः (लब्धि)}$$

गतचान्द्रतिथयः - इष्टक्षयतिथयः = अभीष्टसावनाहर्गण

अभीष्टसावनार्हगण/7 = शेष (दिनपतिः)

अहर्गणकल्पकुदिनभगणानाञ्च माध्यमेन निरक्षदेशीय मध्यमग्रह-साधनं क्रियते। तद्यथा-

यथा स्वभगणाभ्यस्तो दिनराशिः कुवासरैः ।
विभाजितो मध्यगत्या भगणादिर्ग्रहो भवेत् ।।[10]

भास्कराचार्येण स्वग्रन्थे कक्षाप्रकारेणापि मध्यमग्रहसाधनं कृतमस्ति। साक्षदेशेषु मध्यमग्रहसाधनाय स्पष्टभूपरिधेः, देशान्तरसंस्कारस्य, रेखान्तरसंस्कारस्य च ज्ञानमावश्यकं भवति । एभिः संस्कृताः ग्रहाः स्वदेशीयमध्यमग्रहाः भवन्ति। रेखान्तरदेशान्तराणाञ्च माध्यमेनैव वारप्रवृत्तेः ज्ञानं भवति। इष्टकाले ग्रहस्थानं ज्ञानाय शरज्ञानमावश्यकं भवति, येन वास्तविकमध्यमग्रहस्य ज्ञानं भवति। एभिः संस्कारैः संस्कृतग्रहाः स्वदेशीयमध्यग्रहाः भवन्ति। मध्यमग्रहाः दृष्टिगोचराः न भवन्ति। अतः दृग्गणितैक्यसाधनायान्ये संस्काराः दीयन्ते।

मध्यग्रहसाधनाय सूत्रम्-

अहर्गण × कल्पग्रहस्य भगणाः / कुदिनानि = मध्यमग्रहभगणाः (लब्धि)

शेष × 12 / कुदिनानि = राशि (लब्धि)

शेष × 30 / कुदिनानि = अंश (लब्धि)

शेष × 60/ कुदिनानि = कला (लब्धि)

शेष × 60 / कुदिनानि = विकला (लब्धि)

ग्रहलाघवेतु 11 वर्षात्मकं चक्रं परिकल्प्य ग्रन्थारम्भकालिकक्षेपके दिनगण भवखेट: चक्रनिघ्नध्रुवोन: स्वक्षेपके योजनेन मध्यमग्रहो भवति। तत्र एक चक्रजन्यग्रह: भगणोन: ध्रुवत्वेन पठित:। ग्रन्थारम्भकालिकग्रहस्तु क्षेपकत्वेन। अत: क्षेपक, ध्रुवक, अहर्गणोत्पन्नग्रहाणां समन्वयेन उपयुक्तरीत्या ग्रहो भवति।

केतकरेणापि अहर्गणानयनं विधाय 1800 शकाब्दकालिक-ग्रहाणां उच्चानां पातानां क्षेपकान् निरुप्य एकोनविंशति वर्षात्मकं चक्रं प्रकल्प्य ग्रहलाघवोक्तरीत्या ग्रहानयनं कृतम् । तत्र एकोनविंशति वर्षीया: ग्रहा: ध्रुवत्वेन निरुपिता:। तत्र एकस्मिन् चक्रे 6140 सावनदिवसा: तत्राकर्षणसंस्कारोऽपि केतकरेण प्रदत्त: मध्यमग्रहे।

प्राचीनाचार्याणां मध्यमानयने आकर्षणसंस्कार: न प्राप्यते। एवं साधित: मध्यमग्रहस्तु लंकादेशीय: कुमध्यग:। तत्र देशान्तरचरान्तर-संस्काराभ्यां भूमध्यात् ग्रहा: स्वदेशीय: क्रियते । एतदर्थं मध्यभूपरिधित: स्फुटपरिध्यानयनं क्रियते । त्रिज्यायां यदि भूमध्यपरिधि: तर्हि लम्बज्यायां किमिति? मध्यपरिधि: × लम्बज्या / त्रिज्या = स्फुटभूपरिधि:

'स्फुटभूपरिधि अक्षांशभेदात् भिन्ना भिन्ना वर्तते ।'[11]

तत्र स्पष्टभूपरिधौ स्वयाम्योतरात् रेखादेशीययाम्योतरस्य अन्तरम् अवगम्य ग्रहगत्यानुपातेन देशान्तरं साध्यते । यथा-

रेखान्तरयोजनानि × ग्र. गति / स्फुटभूपरिधि: =± देशान्तरफलम्

इदं देशान्तरफलं पूर्वापरगोलार्धक्रमेण मध्यमग्रह: ± देशान्तर-फलम्। तर्हि स्वयाम्योत्तरवृत्तीयग्रह:।[12] परन्तु देशान्तरानयने रेखादेशात् स्वदेशस्य पूर्वापरान्तरम् अभीष्टम्। अत: गणितागत- वेधोपलब्धग्रहण-स्पर्शकालयोरन्तरं घट्यात्मकं विगणय्य तत्तुल्यं देशान्तरकालमानं ज्ञेयम्। गणितागतकालात् यदि स्वदेशीय: काल: अधिक: तदा स्वदेश:? देशान्तरकाल × स्फु. भूपरिधियोजन / 60 = रेखादेशात् स्वदेशस्य देशान्तरयोजनानि । तत: यदि षष्ट्या घट्या ग्रहगति: तदा दे.यो. किमिति? ग्रहगति × दे.यो. / 60 = ± देशान्तरफलम्। अस्य ग्रहे संस्कारेण स्वदेशीयग्रह: जायते।[13]

कालज्ञानं तु पूर्वगोलार्धे पूर्वोदय: पश्चिमे पश्चाद् इति कालनियमेन ज्ञेय:। इत्यनेन तु पूर्वापरान्तरं तद्जन्य संस्कारश्च ज्ञायते परन्तु नाडीवृत्तात् दक्षिणोत्तरान्तरवशात् स्वदेशीयाक्षांशरविक्रान्तिनिष्पत्या परान्तरम् अवगम्य उर्ध्वाधरक्रमेण संस्कृते स्वदेशीय मध्यमग्रह: जायते।[14]

स्पष्टग्रहसाधनम्-

भूमौ प्राण्यादिषु स्पष्टग्रहाणामेव प्रभावो भवति। यथोक्तं-

यात्राविवाहोत्सवजातकादौ खेटै: स्फुटैरेवफलस्फुटत्वम्।[15]

विविधसंस्कारै: संस्कृता मध्यमग्रहा एव स्पष्टग्रहा: भवन्ति। स्पष्टाधिकारे ग्रहाणामष्टधा गतय: प्रतिपादिता: सन्ति। ग्रहगत्याधारेण मन्दपरिध्यंशानां शीघ्रपरिध्यंशानाञ्च वर्णनं सिद्धान्तग्रन्थेषु प्राप्यते। ज्यामितीयगणितेन ज्याकोटिज्यापरमक्रान्तिज्यादीनां साधनं भवति। मन्दपरिध्यंशानां माध्यमेन शीघ्रफलसंस्कारस्य साधनं क्रियते। मन्दशीघ्रफलसंस्कारेण संस्कृता: मन्दस्पष्टा: शीघ्रस्पष्टा: च भवन्ति। तदनन्तरं भुजान्तरसंस्कार:, चरसंस्कार:, उदयान्तरसंस्कारश्च क्रियते येन ग्रहा: स्व-स्व देशेषु स्पष्टा: भवन्ति। स्पष्टग्रहाणां माध्यमेनैव तिथिकरणयोगानां सूक्ष्मप्रकारेण नक्षत्राणाञ्च साधनं भवति। एषां संस्काराणां वर्णनं स्पष्टाधिकारे प्राप्यते।

स्पष्टग्रहस्य महत्त्वं सर्वत्र विद्यते।[16] गणितागतस्य स्पष्टग्रहस्य वेधोपलब्धग्रहेण साम्यं दृग्गणितैक्यम्। वेधवलयस्तु सायन: गणितागतपद्धतिस्तु निरयणाख्या। अत एव गणितागत वेधोपलब्धमन्तरम् अयनांशतुल्यम्।

अर्धज्याग्रे कर्णाग्रे ग्रहभ्रमणात् ज्यागणितं, त्रिकोणगणितीय, चापीयत्रिकोणगणित विधानं सर्वत्र प्रयुज्यते। अत एव भास्करेण ज्यानयनं, ज्यातश्चापसाधनं, भोग्यखण्ड स्पष्टीकरणं प्रदत्तम्। वापुदेवशास्त्री महोदयेन स्फुटचापखण्डसाधनं बीजगणितरीत्या प्रदर्शितम्। पाश्चात्यैरपि प्रथमज्याखण्डं ''वृत्ते: षण्णवत्यंशो दंडवत् परिदृश्यते'' इति मूलस्य विस्तारार्थं कृतम्। तत्र सूक्ष्ममानज्या इ./229 स्वल्पान्तरात् आगच्छति। भारतीय सिद्धान्ते प्रथमज्या 225 तथा त्रिज्या 3438 साधिता। अधुना ज्यागणितं त्रिकोणगणितम् अति विस्तृतं जातम् अत एव संकेतमात्रमेव कृतम्।[17] सूर्यसिद्धान्ते ग्रहणगतिकारणं शीघ्रोच्चं मन्दोच्चं पात: भगणाश्रित: अदृश्यकालश्च निरुपित:।[18] तत्र सव्यापसव्याकर्षणेन विकर्षणेन मध्यमस्थानात् ग्रह: पूर्वापरो भवति। तत्र शीघ्रोचात् मन्दोचात् च अन्तरवशात् आकर्षणं विकर्षणं च जायते।

पातेन दक्षिणोत्तरं विक्षेपः। विक्षपति इति विक्षेपः समुत्पद्यते। बुधभार्गवयोः अत्र वैशिष्ट्यं निरुपितम् सौरमण्डले सौरबिम्बस्य महतत्वात् लघुत्वाच्च तद्- तद् बिम्बानां स्वल्पाधिकं आकर्षणं च निरुपितम्। अत्र सौराकर्षणनिष्पत्या बिम्बीयाकर्षणमपि संकेतितम्।[19] पश्चात् न्यूटेन गुरूत्वाकर्षणसिद्धान्तस्य विस्तारः कृतः। आइस्टाइनमहोदयेन परमोत्कर्षं च प्रदत्तः।

स्पष्टग्रहानयनार्थं सूक्ष्ममन्दोच्चज्ञानं शीघ्रोच्चज्ञानं च विधाय, मन्दोच्चात् शीघ्रोच्चात् ग्रहान्तरं प्रसाध्य मन्दकेन्द्रं शीघ्रकेन्द्रं च साध्यते।

मन्दकेन्द्रे तुलादौ धनं मेषादौ ऋणम्। शीघ्रकेन्द्रे मेषादौ धनम् तुलादौ ऋणम् संस्क्रीयते। राशित्रयाणामेकं पदं एवं चक्रे चत्वारि पदानि भवन्ति। चतुर्थपदेषु विषमे प्रथमे तृतीयपदे गतांशज्या भुजज्या, भोग्यज्या कोटिज्येति, युग्मे पदे गतांशज्याकोटिज्या भोग्यज्या भुजज्या कथ्यते। पदादौ भुजाभावः पदान्ते कोट्याभावः। चापखण्डे ज्यारूपा क्रमज्या, शररूपं यदन्तरं सोत्क्रमज्या अत्रज्या, कोटिज्या, उत्क्रमज्या, क्रमज्या, च सर्वं क्षेत्ररीत्या ज्ञायते। भुजज्या+कोटिज्ययोर्वर्गः त्रिज्येति। अतः मन्दोच्चशीघ्रोच्चयोः सूक्ष्मज्ञानमपेक्षते। सर्वेषां मन्दोच्चानि पूर्वगत्या प्रचलन्ति। केवलं शुक्रस्य विलोमगत्या ग्रहफलोपपत्यर्थमेव उच्चनीचावृत्तानि कल्पितानि। मन्दोच्चेन तच्चलनेन च दूरत्वं ग्रहमार्गस्य अस्थिरत्वं च द्योतते।

अत्र युक्तिः ग्रहस्य यन्त्र-वेधविधिना यत् परमं फलमुपलभ्यते तज्जया परमान्तफलज्येति।

परमान्तफलज्यातुल्यत्रिज्ययासमुत्पन्नवृतमेव नीचोज्वृत्तम्। तत् परिध्यानयनं त्रैराशिकेन कृतम् । 360 × परमान्तफलज्या / त्रिज्या = मन्दपरिधिः भागाः

एवं शीघ्रपरिधिभागाः अपि शीघ्रान्त्यफलज्यया पठिताः।[20] शीघ्रपरिधिभागे तु ओजयुग्मपदान्तभेदेन किंचिदन्तरं उपलभ्यते। शुक्रे तु मन्दकेन्द्रज्या × 2 / त्रिज्या = फलम् । शुक्रस्य मन्दपरिधि - फलम = स्फुटमन्दपरिधिः । ओजान्ते 9 युगमान्ते 11 अन्तरत्वमेव संस्क्रीयते।

शुक्रस्य शीघ्रकेन्द्रज्या × 5 / त्रिज्या = फलं । शुक्रस्य शीघ्रपरिधिः + फलम् = स्फुटपरिधिः। शुक्रस्य ओजयुग्मशीघ्रपरिध्ययोरन्तरं 5, ओजे 263। भौमस्य शीघ्रपरिध्योरपि वर्जितः सन् स्फुटो भवति। एतत् सर्वं वेधोनोपलभ्यते। कालान्तरजन्यान्तरेण मन्दशीघ्र परिधयोऽपि परिवर्तनशीलाः अतः साम्प्रतिकोपलब्धमानमपि प्रदत्तमत्र।

भुजकोट्योः फलायनम् - यावत् केन्द्रं मन्दप्रतिमण्डले तावदेव नीचोच्चवृत्ते स्यात्। अतः प्रतिमण्डलीय ज्याकोटिज्ये निष्पत्या नीचोच्चवृत्ते परिणाम्यते। यदि भांशवृत्ते एते भुजकोटिज्ये तदा परिध्यंशवृत्ते किम् ? वा त्रिज्याव्यासार्धे एते भुजकोटिज्ये तदा अन्तफलज्याव्यासार्धे किम्? फलं तुल्यमेव। अन्त्यफलाज्यापूर्वं नोक्ता अतः ''त्रिज्योद्धृते इत्यनेन ज्यामन्दफलं निरुपितम्।''[21] अनेन मन्दफलेन संस्कृतः सन् सूर्यचन्द्रौ स्फुटौ भवतः। एवं सूर्यस्तु मध्यमग्रहे देशान्तर-चरान्तर-उदयान्तर मन्दफल-भुजान्तर-संस्कारेण स्फुटो भवति। तत्र चन्द्रे उच्चान्तरं पाक्षिकसंस्कारश्च प्रदीयते। अन्येऽपिसंस्काराः केन्द्रच्युतिसंस्कारः इवेच्छनसंस्कारश्च क्रियते। अत्र सामान्यः त्रिज्यावृत्तदीर्घवृत्तयोरन्तरमेव हेतुः भास्करेणापि तुङ्गान्तरं इवेच्छनसंस्कारः प्रदत्तः। पाक्षिकसंस्कारः वेरियेशननाम्ना नव्यैः निरुपिताः। तुङ्गान्तरं तु मन्दोच्चजन्यं नव्यानां वार्षिकसंस्कारनाम्ना प्रसिद्धः। अस्य विकर्षसंस्कारोऽपि नामकरणम्। एवं चन्द्रे उदयान्तरजन्यगतिसंस्कारः (1) कक्षादीर्घवर्तुलोत्पन्नतिथिसंस्कारः (2) सूर्यचन्द्रे मन्दफलजन्यच्युतिसंस्कारः (3) विक्षेपजन्य कक्षापरिणतिसंस्कारः (4) उच्चवशात् उत्पन्नमन्दफलान्तरसंस्कारः। एतेषां संस्कारादीनां प्रयोगाः केतकरीयग्रहगणिते, सर्वानन्दकरणे, प्रभाकरविदसिद्धान्ते, सिद्धान्त ऐतौ च सम्यक् दृश्येते। चन्द्रे भुजान्तरसंस्कारोऽपि क्रियते।[22] नवीनखगोलशास्त्रे चन्द्रस्य सूक्ष्मानयनार्थं 7 संस्काराणां विधानं क्रियते। तत्र चन्द्रस्थितिगणना हैण्डसत तथा ब्राउन महोदयस्य सारिण्या क्रियते। प्र.संस्कारः मुख्याः देशान्तरं, भुजान्तरम्, उदयान्तरम् च तद् अतिरिक्तम्। स्फुटवलनं स्फुटदृक्कर्म चापि पृष्ठीयानयानार्थं प्रयुज्यते। परन्तु भौमादिपंचताराग्रहाः केवलं मन्दफले संस्कृताः न भवन्ति स्फुटाः तत्र शीघ्रफलमपि संस्क्रीयते। अतः मन्दशीघ्रफलाभ्याम् संस्कृतास्ते स्फुटाः भवन्ति। एवं साधितः निरयण क्रान्तिवृत्तीयाश्च जायते। विक्षेपजन्यसंस्कारः दृक्कर्मजन्यसंस्कारेण ते दृग्गणितैक्यं प्राप्नुवन्ति।

कर्णानयनम्-प्रतिवृत्तभङ्ग्या पञ्चताराग्रहाणां कर्णानयनं स्फुटानयनार्थं क्रियते । एवं नीचोच्चवृत्तभङ्ग्याऽपि भवति। कक्षावृत्ते-प्रतिवृत्तयोः तीर्यकस्य रेखयोरन्तरम् किम् अन्त्यफलज्या। प्रतिमण्डले कोटिज्या अन्त्यफलज्याग्रादुपरि भवति। अतः मकरादिकेन्द्रे कोज्या + अ.फलज्या = स्फुटकोटिः। कर्कादौ तु कोटिज्यान्त्यफलज्ययोर-न्तरम् स्फुटकोटिः । स्फुटकोटिमूलस्य भूबिन्दोश्च यदन्तरं तद् भुजज्या

तुल्यमेव स्यात्। अतः भुजवर्ग + कोटिवर्ग = कर्णवर्गः। एवं प्रकारचतुष्ट्येन कर्णानयनं सम्पाद्यते।[23]

भौमादीनां शीघ्रफलानयनम्-कर्णकोटिसूत्रयोर्यदि कर्णाग्रे भुजफलतुल्यमन्तरं तदा त्रिज्याग्रे किमिति? (ज्याभुजफलं × त्रिज्या) / कर्ण वा (भुजज्या × शीघ्रान्त्यफलज्या) / कर्ण = ज्याशीघ्रफलम्। अस्याश्चापं शीघ्रफलमिति । एवं सर्वेषां शीघ्रफलानि साधितानि।[24]

सन्दर्भाः

1. अष्टाध्यायी-5/5/124
2. सिद्धान्तशिरोमणि-म. अ. श्लो.-11
3. मुहूर्तचिन्तामणि-पृ.-12 पीयूष टीका
4. भारतीयज्योतिशास्त्रस्येतिहास-पृ.-16
5. सिद्धान्तशिरोमणि-म.अ.का.अ. श्लो-6
6. ग्रहलाघवम्-पृ.-273
7. भारतीयज्योतिषशास्त्रस्येतिहासः-पृ.9
8. ग्रहलाघवम्-पृ.-273
9. सूर्यसिद्धान्त अ. अ. श्लोक-48, 49, 50, 51
10. सूर्यसिद्धान्त अ. अ. श्लोक-53
11. सि. शि. ग्र. म. भूपरिध्याध्याये श्लो.-2
12. सि. शि. ग्र. म. भूपरिध्याध्याये-3
13. सि. शि. ग्र. म. भूपरिध्याध्याये-4-5
14. सि. शि. ग्र. म. भूपरिध्याध्याये-6
15. सिद्धान्तशिरोमणि-स्पष्टाधिकारः श्लो.-1
16. सि. शि. स्प. श्लो.-1
17. सि. शि. स्प. श्लो.-2
18. सि. शि. स्प. श्लो.-1-2
19. सि. शि. स्प. श्लो.-3 तः 11
20. सि. शि. स्प. श्लो.-22-25
21. सि. शि. स्प. श्लो.-26
22. केतकरीय ग्रहगणितम् मध्यमाधिकार श्लो. 21-24
23. सि. शि. स्प. श्लो.-27-29
24. सि. शि. स्प. श्लो.-32

डॉ हरिनारायणधरद्विवेदी, सहायकाचार्यः (ज्योतिष विभागः)

राष्ट्रियसंस्कृतसंस्थानम्, वेदव्यासपरिसरः, बलाहरः, काँगडा, हि.प्र.

ISSN 2456-3420

सूर्यचन्द्रयोः भावफलविमर्शः

डॉ. प्रदीपशर्मा

पूर्वजन्मकृतशुभाशुभकर्मभिः इह जन्मनि जायमानं प्रभावं निरूपयति ज्योतिश्शास्त्रम् इति स्वयम् आचार्यवराहमिहिरेण अन्यैश्च आचार्यैः स्व-स्वग्रन्थे निरूपितम्। अमुमेव आशयं स्पष्टयति आचार्यः मीनराजः स्वीये वृद्धयवनजातकग्रन्थे-

या पूर्वकर्मप्रभवस्य धात्री धात्रा ललाटे लिखिता प्रशस्तिः।

तां शास्त्रमेतत् प्रकटं विधत्ते दीपो यथा वस्तु घनेऽन्धकारे।।[1]

ज्योतिश्शास्त्रे जातकफलनिरूपणावसरे दृग्फल-दशाफल-भावफलादिषु अस्ति महन्महत्त्वं भावफलस्य। इदमेव भावफलं ज्योतिषशास्त्रस्य फलादेशपरम्परायां प्रधानभूतमङ्गमिति सर्वैरेवाङ्गी-क्रियते। भावेषु ग्रहाणां योगायोगेन फलनिर्धारणं भवति। भावज्ञानं विना फलितज्योतिषस्य चक्रमग्रेसारयितुं न शक्यत इत्यपि वक्तुं शक्यते। जातकस्य जन्मकाले यो राशिः क्षितिजसंलग्नो भवति स एव राशिर्लग्नमुच्यते। ततः लग्नादिद्वादशभावानां गणना क्रियते। तत्र भावनिरूपणावसरे लग्नभावः प्रथमभाव इति ज्ञेयः। लग्नं यस्मिन् राशौ विद्यते तस्मादेव भावानां प्रवृत्तिः। तत्र तु भचक्रस्य समद्वादशभागा एव द्वादशराशयः भवन्ति। तानि द्वादशराशिनामाधारेणैव द्वादशलग्नानि दैवज्ञैः कल्पितानि। सन्दर्भेऽस्मिन् उच्यते यत्-

भचक्रस्य समा भागा उक्ता द्वादश राशयः।

राशीनामुदयो लग्नं ते तु मेष-वृषादयः।। इति

द्वादशभावेषु प्रथमभावस्य लग्नं शरीरं तनु इत्यादीनि नामान्तराण्यपिविद्यन्ते। सिद्धान्तदृष्ट्या पश्यामश्चेत् क्रान्तिवृत्तस्य यः भागः उदयक्षितिजं लगति तदेव प्रथमलग्नम्। लग्नादारभ्य भावानां प्रवृत्तिर्भवति इति हेतोः अस्य भावस्य प्रथमभाव इति संज्ञा। तथैव देहः अस्ति चेदेव शुभाशुभफलानां विवेचनं क्रियते। पुनश्च ''शरीरमाद्यं खलुधर्मसाधनम्'' इतिवाक्यानुरोधेनापि आदौ शरीरस्यैव प्राधान्यम्। तदर्थमस्य प्रथमभावस्य तनुभाव इति संज्ञा। इतः आरभ्य द्वादशसंख्यकाः भावाः विचार्यन्ते। आहत्य द्वादशभावास्तनुधनसहजबन्धुपुत्रारियुव-तीरन्ध्रधर्मकर्मलाभव्ययाख्याः भवन्ति।

वस्तुतः भावस्तु विशिष्टः प्रोक्तः पद्मप्रभुसूरिणा प्रश्नशास्त्रे। तद्यथा-

इन्दुः सर्वत्र बीजाभो लग्नं कुसुमप्रभम्।

फलेन सदृशोंशऽश्च भावः स्वादुसमः स्मृतः।।[2]

एतदनुसारं फलादेशस्य चत्वारि प्रमुखाङ्गानि कथितानि सन्ति। चन्द्रः लग्नं नवांशः भावश्च। तत्र चन्द्रः बीजतुल्यः, लग्नं पुष्पतुल्यम्, नवांशः फलम्, भावस्तु स्वादसमः उक्तः। अत एव चन्द्रस्य भावस्य च विशेषसम्बन्धफलमत्र क्रमशः निरूप्यते। यतोहि ग्रहाः एव ज्योतिषशास्त्रस्य मूलभूताः अंशाः सन्तियेषामाधारेण किमपि फलं काऽपि स्थितिः वा सम्पद्यते। ग्रहेषु हि ''प्रत्यक्षं ज्योतिषं शास्त्रं चन्द्रार्कौ यत्र साक्षिणौ'' इत्यभियुक्तवचनात् अस्ति किञ्चन वैशिष्ट्यं सूर्यचन्द्रयोः फलस्य। तदेव अग्रे क्रमशः निरूप्यते।

बृहज्जातके तु वराहमिहिराचार्येण-''भूरिद्रव्यो नृपहृतधनो वक्त्ररोगी द्वितीये''[3] इति फलं निगदितं लग्नात् द्वितीये सूर्यस्य। आचार्यमीनराजमतानुसारं लग्नात् द्वितीये स्थाने सूर्यस्थित्या जातो धनहीनः प्रसिद्धिरहितः कृतघ्नः श्रद्धाहीनः दुःशीलः कुमित्रयुक्तः परवञ्चकश्च भवति। उक्तञ्च-

''द्वितीयसंस्थः कुरुतेऽर्थहीनं सूर्यः प्रसिद्ध्यारहितं कृतघ्नम्।

श्रद्धाविहीनं विगतस्वभावं कुमित्रयुक्तं परवञ्चकं च।।[4]

किञ्च सारावल्यां कल्याणवर्मणा-''द्विपदचतुष्पदभोगी''[5] इत्युच्यते एवं त्रयाणामपि आचार्याणां मतेषु परस्परं वैविध्यमवलोक्यते। किन्तु मीनराजेन कुमित्रयुक्तः परवञ्चकश्च जातकः उक्तः, एवं स्थितौ वराहमिहिरस्य कथनं तत्पूरकमेव। यतः अस्यामवस्थायां जातकः वञ्चनादिना धनन्तु अर्जयेत् किन्तु राज्ञा दण्डरूपेण वा जातकः नष्टधनः भवेत्। इदञ्च क्रूरफलं द्वितीयभावे क्रुरस्य सूर्यस्य स्थित्या सम्भवेत् इति अभिज्ञायते।

सूर्ये तृतीयभावे स्थिते सति जातकः रोगविहीनः सुतबन्धुहीनः परोपकारयुक्तः नम्रशीलः प्रसिद्धः विवेकविद्यायुक्तश्च भवति। उक्तञ्च मीनराजेन-

''सूर्यस्तृतीये कुरुते मनुष्यं निरोगदेहं सुतबन्धुहीनम्।

परोपकारं प्रणतं प्रसिद्धं विवेकविद्याभ्यधिकं सदैव।।[6]

मानसागर्यां हि आचार्यश्रीमान्दैवज्ञः मीनराजमतमेव स्वीकुर्वन् भ्रातृनाशः इति फलं सूर्यस्य तृतीयभावे स्थितिवशात् अवादीत्। तद्यथा-

''सहजभवनसंस्थे भास्करे भ्रातृनाशः।

प्रियजनहितकारी पुत्रदाराभियुक्तः।।[7]

अन्यच्च मीनराजस्य परोपकारफलं स्वीकुर्वन् अयमाचार्यः प्रियजनविषयकमेव उपकारमवादीत्। किन्तु पुत्रयुक्तः इति कथनं तु मीनराजमतविरुद्धमेव। यद्यपि तृतीयभावकारकग्रहः भौमःभवति, क्रूरस्य सूर्यस्य च तत्र स्थितिवशात् क्रूरफले वृद्धिः भवेदित्यतः कदाचित् मीनराजमतं सम्यक् भाति।

आचार्यमीनराजेन चतुर्थभावस्थसूर्यविषये प्रतिपादितं यत् लग्नात् चतुर्थे भावे सूर्ये स्थिते सति जातः कृतघ्नः हिंसकः दुश्शीलः स्त्रीभिर्जितः स्त्रीहीनः युद्धकर्ता कुदेहयुक्तः सत्यविरहितश्च भवति। किञ्च मानसागर्यां तु व्यत्यासपूर्वकं श्रीमानदैवज्ञेन उक्तं यथा-

विविधजनविहारी बन्धुसंस्थे दिनेशे

भवति च मृदुवक्ता गीतवाद्यानुरक्तः।

समरशिरसियुद्धे नास्ति भङ्गं कदाचित्

प्रचुरधनकलत्रः पार्थिवानां प्रियश्च।।[8] इति

अत्र विविधजनविहारी गीतवाद्यानुरक्तः इत्यादिफलानि मीनराजस्य 'स्त्रीभिर्जितः' इति मतसदृशान्येव, यतः स्त्रीभिः गीयमानगीतादिषु वाद्यादिषु स्त्रीविहारादिषु च लीनताकारणात् स्त्रीभिर्जितः भवति जातकः इति उभयोः फलकथनप्रकारयोः समतां अवलोक्यते। यद्यपि अत्रापि 'प्रचुरधनकलत्रः' इति कथनस्य मीनराजेन सह मतभिन्नता दृश्यते एव।

लग्नात् पञ्चमेऽर्के जातः स्वल्पपुत्रयुक्तः स्नेहविरहितः कुकर्मणिरतः व्यसनाभिभूतः पित्तरोगी बहुशत्रुयुक्तश्च भवति। उक्तञ्च मीनराजेन-

सुतस्थितः स्वल्पसुतं प्रसूते दिवाधिनाथः प्रणयेन हीनम्।

कुकृत्यरक्तं व्यसनाभिभूतं पित्ताधिकं भूरिविपक्षयुक्तम्।।[9]

मीनराजस्य एव 'स्वल्पसुतम्' इति मतं स्वीकुर्वन् श्री ढुण्ढिराज-दैवज्ञः जातकाभरणे 'स्वल्पापत्यम्' इति फलं निरूपयति। तद्यथा- ''स्वल्पापत्यं शैलदुर्गेशभक्तं सौख्यैर्युक्तम्''[10] अस्यां ग्रहस्थितौ जातकः पार्वतीशङ्करस्य च भक्तः प्रतिपादितः। मानसागर्यां तु शैशवे दुःखभागी यौवने च व्याधियुक्तः इति फलं लभ्यते।

अष्टमस्थे सूर्ये जातः विदेशे कार्यरतः क्षुधाप्रभावेण पीडितः रोगयुक्तः लोकप्रियहीनश्च भवति। उक्तञ्च मीनराजेन-

''करोति सूर्ये खलु चाष्टमस्थो विदेशरक्तं पुरुषं प्रहीणम्।

प्रपीडितं क्षुत्प्रभवैश्च रोगैर्जनानुरागेण विवर्जितं च।।[11]

अस्मिन् सन्दर्भे बृहज्जातके तु ''स्वल्पात्मजो निधनगे विकलेक्षणश्च।''[12] इति फलमुक्तं वर्तते। अष्टमभावस्य कारकग्रहः शनिः, शनिः सूर्यस्य शत्रुः भवति, पुनः अष्टमभावस्य अशुभत्वेन फलमपि अशुभमेव प्राप्यते।

यस्यां जन्मकुण्डल्यां सूर्यः नवमभावे स्थितः भवति सः जातकः विख्यातः राजप्रियः शत्रुभ्यः धनप्राप्तकर्ता धर्मक्रियाविहीनः बुद्धिहीनश्च भवति। फलदीपिकायां हि इत्थं निगद्यते फलम् आचार्यमन्त्रेश्वरेण-

''विजनकोऽर्के ससुतबन्धुस्तपसि देवद्विजमनाः।

ससुतयानस्तुतिमतिश्रीबलयशाः खे क्षितिपतिः।।[13]

उक्तञ्च मीनराजेनापि-

''धर्माश्रितस्तीक्ष्णकरः प्रसिद्धं करोति मर्त्यं नृपतेरभीष्टम्।

परोत्थवित्तेन सदा समेतं निरस्तधर्मं मतिवर्जितं च।।[14]

अत्र पितृहीनः सुमतिबलयुक्तश्च इति विशेषेण प्रतिपादितम् यस्मिन् विषये मन्त्रेश्वराचार्यस्य मीनराजेन सह व्यत्यासः दृश्यते।

सूर्यवशात् फलकथने स्फुटता दृश्यते तथैव चन्द्रवशादपि अवश्यं भवति इति अनुभववेद्यः राद्धान्तः। यदि जातकस्य जन्मकुण्डल्यां चन्द्रः लग्नस्थः भवेत् तदा समुत्पन्नः जातकः सुन्दरः कान्तियुक्तः तीक्ष्णः कृषकाययुतः बहुपापयुक्तः मित्रहीनश्च भवतीति मीनराजेन प्रतिपादितं यथा-

''मूर्तिस्थितो रात्रिपतिः प्रसूते सम्पूर्णबिम्बः सुभगं सुकान्तम्।

तीक्ष्णक्षयाङ्गं बहुपापयुक्तं विहीनपक्षं गतसौहृदं च।।[15]

यद्यपि शुभस्य चन्द्रस्य लग्ने स्थितिवशात् जातकस्य सुन्दर-कान्तियुक्तता-कृषकायादीनि फलानि युक्तियुक्तानि एव चन्द्रस्य स्त्रीत्वकारणात् किन्तु बहुपापयुक्तः मित्रहीनश्च इति फलं तु विशिष्टं प्रतिभाति। अयमेव विषयः आचार्यवराहमिहिरेण बृहज्जातके विविधरोगकथनपूर्वकं निरूपितः। तद्यथा-मूकोन्मत्तजडान्धहीनव-धिरप्रेष्याः शशाङ्कोदये।''[16] चन्द्रस्य लग्ने स्थितिवशात् इमे सर्वेऽपि रोगाः जायन्ते इति विशेषः।

षष्ठस्थाने चन्द्रस्य विद्यमानताकारणात् जातकः रोगयुक्तः शत्रुयुक्तः कुरूपदेहयुक्तः कुबुद्धिः सुखेनहीनः परवञ्चकः भवति इति मीनराजेन प्रतिपादितम्।

षष्ठः शशाङ्कः कुरुतेऽल्पजीवं रोगाधिकं शत्रुनिपीडिताङ्गम्।

कुरूपदेहं कुधिया समेतं सौख्यैर्विहीनं परवञ्चकं च॥[17]

शत्रुभावे स्थितचन्द्रस्य पापफलमिदं युक्तिसङ्गमेव किन्तु आचार्यवराहमिहिरेण तु तत्रापि सौम्यं फलमुक्तम् इति तु अनुसन्धेयः विषयः। तद्वचनं यथा **नैकारिर्मृदुकायवह्निमदनस्तीक्ष्णोऽलसश्चारिगे॥**[18]

द्वादशस्थे चन्द्रे जातकः व्ययाधिक्येन पीडितः कृतघ्नः वैरयुतः बहुशत्रुयुक्तः अल्पायुः बहुसत्यविहीनवेषयुक्तश्च भवति इति मीनराजेन प्रतिपादितम्। बृहज्जातकेतु "**क्षुद्रऽङ्गहीनो व्यये**"[19] इति। अत्र पापफल-कथनं समीचीनमेव यतः सामान्यतया त्रिकभावे शुभग्रहाः अशुभफलं एव प्रयच्छन्ति किञ्च षष्टाटमव्ययभावानां कारकग्रहः शनिः भवति।

अनेन प्रकारेण ज्योतिषशास्त्रस्य महद्भिः आचार्यैः द्वादशभावेषु सूर्यचन्द्रग्रहयोः फलं विशेषेणोक्तम्। यद्यपि बहुषु फलेषु आचार्याणां परस्परं मतभेदोऽपि दृश्यते। तथापि अत्र वर्णितग्रहभावफलकथने अन्यैः आचार्यैः सह बृद्धयवनजातककारस्य मीनराजस्य व्यत्यासः प्राप्तः अतः विशेषेण उल्लेखः कृतः इति। केषां मतम् अङ्गीकरणीयम् इत्यत्र विदुषामनुभव एव प्रमाणम्। इतोपि विशेषतया फलकथनावसरे ग्रहाणां बलाबलं, भावः, भावाधिपतिः, दृष्टिविचारः ,स्वराशि-उच्चनीचस्थानं, मूलत्रिकोणम, षड्वर्गबलं, ग्रहमैत्रीत्यादयः विषयाः अवश्यं विचारणीयाः भवन्तिइति शम्।

सन्दर्भसूची

1. वृ.य.जा. 1.3
2. भुवनदीपकः, 56
3. वृ.य.जा. 20-1
4. वृ.य.जा. 16-2
5. सारा. 30-3
6. वृ.य.जा. 16-3
7. मा. 2-46
8. मा. 2.47
9. वृ.य.जा. 16.5
10. जा. पृ.88.5
11. वृ.य.जा. 16.8
12. बृहज्जातकम् 20.3
13. फल.दी. 8.4
14. वृ.य.जा. 16.9
15. वृ.य.जा. 16.13
16. वृहज्जातकम् 20.4
17. वृ.य.जा. 16.18
18. वृहज्जातके 20-4
19. वृ. 20.5।

परिशीलितग्रन्थसूची

1. वृद्धयवनजातकम्, मीनराजप्रणीतम्, व्याख्या.- सुरेशचन्द्रमिश्रः, रंजन पब्लिकेशन्स, नई दिल्ली।
2. बृहज्जातकम्, वराहमिहिरप्रणीतम्, रुद्रविवरणी टीका, चौखम्बा सुरभारती प्रकाशन, वाराणसी।
3. सारावली, कल्याणवर्मविरचिता, व्याख्याकारः-गोपेशकुमार ओझा, मोतीलालबनारसीदास, नई दिल्ली।
4. प्रश्नभूषणम्, जीवनाथविरचितम्, व्याख्या- आचार्यगुरुप्रसादगौड, चौखम्भासुरभारती प्रकाशन, वाराणसी।
5. मानसागरी-मानदैवज्ञविरचिता, सं. -डा. रामचन्द्रपाठकः, चौखम्बासंस्कृतप्रकाशन, वाराणसी।
6. फलदीपिका, मन्त्रेश्वरविरचिता, सं. -हरिशंकरपाठकः, चौखम्बासुरभारतीप्रकाशन, वाराणसी।
7. जातकपारिजातः, दैवज्ञवैद्यनाथविरचितः, टीकाकारः- कपिलेश्वरशास्त्री, चौखम्बासुरभारती प्रकाशन, वाराणसी।
8. भुवनदीपकः, पद्मप्रभुसूरिविरचितः, व्याख्या.- डा. कामेश्वर उपाध्यायः, चौखम्बा कृष्णदास अकादमी, वाराणसी।

डॉ. प्रदीपशर्मा , ज्योतिषविभागः (अतिथिप्राध्यापकः)

राजीवगान्धीपरिसरः शृङ्गेरी, कर्णाटकम्

ISSN 2456-3420

अग्निपुराणसम्मतं वास्तुपुरुषचिन्तनम्

डॉ. मनोजश्रीमाल:

वास्तुपुरुषं वस्तुतः पुरुषस्य संज्ञा दीयते। तत्राग्निपुराणे[1] अस्य उत्पत्तिर्विषये वर्णनं प्राप्यते यत् प्राचीनकाले प्राणीनां भयकारको महानभूतस्योत्पत्तिभूत्। तं दृष्ट्वा देवैः सः भूमौ स्थाप्यते। स एव प्राणी वास्तुपुरुषनाम्ना अभिहितः वर्तते। यथोक्तम् -

पूर्वमासीन्महद्भूतं सर्वभूतभयङ्करम्।

तद्देवैर्निहितं भूमौ स वास्तुपुरुषः स्मृतः॥

एवमेव विश्वकर्मप्रकाशेऽपि कथितं यत् पूर्वं त्रेतायुगे एको महाभूतः समुत्पन्नो बभूवः। यः स्वकीयेन सुप्तशरीरेण सम्पूर्णं जगदिदमाच्छादित-मकरोत्। तं च विलोक्य सेन्द्राः सर्वे देवाः विस्मिताः अभवन्। यमोऽपि भयाक्रान्तो भूत्वा ब्रह्माणं शरणं ययौः। देवाः अपि तच्छरणं जग्मुः।[2] वास्तुपुरुषस्योत्पत्तिविषये बृहत्संहितायां वास्तुसौख्ये च समानमेव वर्तते उपलभ्यते वा। अनयोः अनुसारं पूर्वकाले स्वशरीरेण पृथ्वी-आकाशयोः आच्छादकः कश्चन अपरिचिता व्यक्तिः जाता। तां दृष्ट्वा देवैः अधोमुखं कृत्वा पृथिव्यां स्थाप्यते। तस्मिन् काले ये देवाः यस्याङ्गं स्वीकृतासन् तेषां स्थानं तदेव अभवत्। तं देवमयापरिचितं ब्रह्मा वास्तुपुरुषनाम्नः अभिहितः।[3] मत्स्यपुराणनुगुणं भगवच्छिवस्य अन्धकदैत्येन साकं युद्धं जातम्। अनन्तरं भगवता सः हन्यते। युद्धस्य फलरूपेण शिवस्य मस्तकस्य स्वेदकणात् विराट्पुरुषस्योत्त्पत्तिरभूत्। तेन तपबलेन शिवानुकम्पया वरं प्राप्यते तथा च त्रिलोकभक्षणं इक्ष्यते। तद् भगवता मन्यते। त्रिलोकान् स्वीकृत्य सः अधोवक्त्र भूत्वा निपतितः। भयाक्रान्तदेवाः तं धृत्वा तस्मिन् स्वस्थाननिर्माणं कुर्वन्ति। स एव पुरुषः वास्तुपुरुषनाम्नाः प्रसिद्धोऽभूत्।[4] वास्तुराजवल्लभे लिखितं यद् वास्तुपुरुषस्योत्पत्तिः भगवतः शिवस्य स्वेदविन्दुभिः जाता। अस्मिन् विषये एकां पौराणिककथामाश्रित्य तेन विलिखितं यद् वास्तुपुरुषः स्वेदविन्दुभिरुत्पन्नः।[5]

वास्तुपुरुषस्य उत्पतिः विषये वर्णितमस्ति यत् भाद्रपदमासे कृष्णपक्षस्य तृतीयायां तिथौ, शनिवासरे, कृतिकानक्षत्रे, व्यतीपातयोगे, विष्टिकरणे, भद्रामध्ये, कुलिकमुहूर्ते तस्योत्पत्तिर्जाता।[6] भगवतो महेश्वरस्य स्वेदबिन्दुभिः समुत्पन्नस्य वास्तुपुरुषस्य विषये अग्निपुराणे 252 अध्याये, अग्निपुराणे 40/1 सन्दर्भे, च इदमेव कथितमस्ति। शिल्परत्नम् (7/4/29), अपराजितपृच्छा (53) ईशानशिवगुरुदेवपद्धतिः इत्यादिषु ग्रन्थेषु वास्तुपुरुषस्य समुत्पत्तिः शुक्राचार्यस्य यज्ञे परस्परं वैमत्यं तु स्वाभाविकमेव।

मेरुतन्त्रम् इति नामके ग्रन्थे वास्तुपुरुषस्य समुत्पत्तिविषये भिन्नैवं कथां दृश्यते। तदनुसारं वास्तुसंज्ञकः असुरः लोकत्रयं विजित्य प्रजापतिपदं प्राप्तमकरोत् तथा च सः दर्पसमन्वितो जातः। सः भगवन्तं विष्णुमेव आहवार्थमाहवयत्। भगवतो मायया मोहितो भूत्वा सः असुरः वरयाचनार्थं भगवन्तम् अकथयत्। भगवान् विष्णुश्च तस्य मृत्योः वरं तस्मादयाचत्। तेन सः असुरः तत्रैव स्वप्राणान् तत्याज्य। तस्य शरीरं तत्रैव भूमौ प्रविष्टमभूत्। तद्दृष्ट्वा सर्वे देवाः तस्मिन् स्थाने मृत्तिकां प्रपूर्य अतिष्ठान्। एतद् विलोक्य भगवान् विष्णुः तस्मै वरं ददौ यद् यदापि पृथिव्यां वास्तुकार्यं भविष्यति तदा सर्वप्रथमं भवतः पूजा भविष्यति।[7] वास्तुपुरुषोत्पत्तिविषये मत्स्यपुराणोक्तमाख्यानमाधाररूपेण गृह्यते। यथा -

तदिदानीं प्रवक्ष्यामि वास्तुशास्त्रमनुत्तमम्।

पुरान्धकवधे घोर घोररूपस्य शूलिनः॥

ललाटस्वेदसलिलमपतद् भूवि भीषणम्।

करालवदनं तस्माद् भूतमद्भुतमुल्वणम्॥

ग्रसमानमिवाकाशं सप्तद्वीपं वसुन्धराम्।

ततोऽन्धकानां रुधिरमपिबत् पतितं क्षितौ॥

प्रसीदध्वं सुराः सर्वे युष्माभिर्निश्चलीकृतः।

प्रसीदध्वं सुराः सर्वे युष्माभिर्निश्चलीकृतः।

स्थास्याम्यहं किमाकारो ह्यवष्टब्धो ह्यधोमुखः॥[8]

अस्मिन् पर्याये वास्तुमण्डने[9]-

पुरान्धकवधे शम्भो ललाटात् पतितः क्षितौ।

स्वेदस्तस्मात् समुद्भूतं भूतमत्यन्तदुस्सहम्॥

गृहीत्वा सहसा देवैर्न्यस्तं भूमावधोमुखम्।

जानुनी कोणयोः पादौ रक्षोदिशि शिवे शिरः॥

एवं बृहस्पतेर्मतम् उत्पलभट्टेनऽपि समुद्धृतम्। यथा-

पुरा कृतयुगे ह्यासीन्महद्भूतं समुत्थितम्।
व्याप्यमानं शरीरेण सकलं भुवनं ततः॥
तद् दृष्ट्वा विस्मयं देवा गताः सेन्द्रा भयावृताः।
ततस्तैः क्रोधसंतप्तैर्गृहीत्वा तमथासुरम्॥
विनिक्षिप्तमधोवक्त्रं स्थितास्तत्रैव ते सुराः।
तमेव वास्तुपुरुषं ब्रह्मा समभिकल्पयेत्॥[10]

वास्तुपुरुषस्यावस्थितिः -

यदा तं महाभूतं देवाः अधोमुखं कृत्वा भूमौ पातयामसुस्तदा तस्य शिरः ईशानकोणे चरणौ च नैर्ऋत्यकोणे आस्ताम्। वास्तुपुरुषस्य वास्तुभूमौ स्थितिः प्रायः सर्वेषु ग्रन्थेषु समानमेव विद्यते। बृहत्संहितायां वास्तुपुरुषः ईशानकोणे शिरं निधाय अधोमुखी वर्तते।[11] बृहसंहिता-समराङ्गणद्यन्यमते वास्तुपुरुषस्य अङ्गोपरि देवविशेषस्य स्थितिः यथा निर्दिष्टा वर्तते तथा अग्निपुराणे त्रिणवतितमेऽध्याये पञ्चाधिकैकशततमेऽध्याये च न दृश्यते। एवमेव मर्मस्थानज्ञानाय रेखास्थापनविधेरपि सङ्केतरूपेणैव अग्निपुराणे उल्लेखोऽस्ति। अग्निपुराणमते वास्तुपुरुषस्य भूमौ स्थापनम् एवं विधेयम् -

आकुञ्चितकरं वास्तुमुत्तानमसुराकृतिम्।
स्मरेत् पूजासु कुड्यादिनिवेशे त्वधराननम्॥
जानुनी कर्पूरौ सक्थि दिशि वातहुताशयोः।
पैत्र्यां पादपुटौ रोद्र्यां शिरोऽस्य हृदयेऽञ्जलिः॥
अस्य देवे समारुढा देवताः पूजिताः शुभा॥[12]

भूनिविष्टस्य वास्तुदेवस्य स्वरूमग्निपुराणे एवं वर्णितमस्ति। वास्तुदेवतापूजनकाले कुञ्चितकेशधारिणः असुराकृतिकस्य वास्तुदेवस्य उत्तानावस्थास्थितस्य अर्चनं कार्यम्। किन्तु कुड्यादिनिवेशकाले तस्य वास्तुपुरुषस्य स्वरूपमन्यत् वर्णितमस्ति। कालेऽस्मिन् भून्यस्तः वास्तुदेवः अधोमुखः सन् स्थितो भवति। तस्य कर्पूरयुक्ते जानुनी क्रमशः वायव्य-अग्निकोणे भाव्ये। वास्तुपुरुषस्य संयुतो पादौ नैर्ऋत्ये तथा शिर ईशानकोणे चिन्तनीयम्। एतादृशः वास्तुपुरुषः बद्धकरोऽस्ति। तस्य वास्तुपुरुषस्य शरीरे स्थितानां देवानां पूजा शुभफलदायिनी भवति। अग्निपुराणे मर्मस्थानानि एवं वर्णितानि सन्ति-

समस्त नाडीसंयोगे महामर्माम्बुजं फलम्।
त्रिशूलं स्वस्तिकं वज्रं महास्वस्तिकसम्पुटौ॥
त्रिकटं मणिबन्धश्च सुविशुद्धं पदं तथा।
इति द्वादश मर्माणि वास्तोर्भित्त्यादिषु त्यजेत्॥[13]

समस्तानि नाडीसम्पातस्थानानि, महामर्मस्थानानि तथा कमल-फल-त्रिशूल-स्वस्तिक-वज्र-महास्वस्तिक-सम्पुट-त्रिकटि-मणिबन्ध-सुविशुद्धानि प्रभृतीनि द्वादशमर्मस्थानानि अग्निपुराणमते वास्तुमण्डले परिगणितानि सन्ति। एकाशीतिवास्तुपदविन्यासप्रसङ्गे पूर्वाभिमुखीनाम् उत्तराभिमुखीनाञ्च दशदशसंख्याकानां नाडीनां शिराणामुल्लेखः वर्तते। यथा -

प्रागस्या दशधा नाड्यस्तासां नामानि च ब्रुवे।
शान्ता यशोवती कान्ता विशाला प्राणवाहिनी॥
सती वसुमती नन्दा सुभद्राऽथ मनोरमा।
उत्तरास्या दशान्याश्च एकाशीत्यङ्घ्रिकारिका॥
हरिणी सुप्रभा लक्ष्मीर्विभूतिर्विमला प्रिया।
जया ज्वाला विशोका च स्मृतास्ताः सूत्रपातत॥[14]

अर्थात् शान्ता, यशोवती, कान्ता, विशाला, प्राणवाहिनी, सती, वसुमती, नन्दा, सुभद्रा तथा मनोरमा इति एताः दशनाड्यः पूर्वाभिमुखप्रवहमाणाः, एवमेव हरिणी, सुप्रभा, लक्ष्मीः, विभूतिः, विमला, प्रिया, जया, ज्वाला, स्मृता तथा विशोका उत्तराभिमुखं प्रवहमानाः सन्ति।

अन्यमते वंशानयनं मर्मस्थानानि नाड्यश्च -

मत्स्यपुराणे एकाशीतिवास्तुपदनिर्णयाख्ये त्रिपञ्चाशदधिकद्विशततमे वास्तुपदचक्रे वंशाः, मर्मस्थानानि च वर्णितानि सन्ति।[15] यथा -

वंशानिदानीं वक्ष्यामि ऋजूनपि पृथक् पृथक्।
वायुं यावत्तथा रोगात् पितृभ्यः शिखिनं पुनः
मुख्याद्भृशं तथा शेषाद्वितथं यावदेव तु।
सुग्रीवाददितिं यावन्मृगात्पर्जन्यमेव च
एते वंशाः समाख्याताः क्वचिगा जयमेव तु
एतेषां यस्तु सम्पातः वर्ज्यानि तुलाविधिषु सर्वदा इति।

एवमेव बृहत्संहितायामपि वर्णितानि।[16] किञ्च -

रोगाद्वायुं पितृतो हुताशनं शोषसूत्रमपि वितथात्।

मुख्याद्भृशं जयन्ताच्च भृङ्गमदितेश्च सुग्रीवम्

तत्सम्पाता नव ये प्रोक्तं मर्मपरिमाणम्।[17]

इत्थं मत्स्यपुराणाद्यन्यमते मर्मस्थानज्ञानाय वंशस्थापनप्रक्रिया तेषां वंशविन्यासोद्भवानां सम्पातस्थानानां नामाल्लेखश्च वर्तते। एकाशीतिवास्तुपदचक्रे रोगस्थानात् वायुदेवं यावत् प्रथमः वंशः पितृस्थानादग्निपर्यन्तं द्वितीयो वंशः, वितथस्थानात् शेषं यावत् तृतीया रेखा, मुख्याद्भृशपर्यन्तं चतुर्थः वंशः, जयन्तस्थानात् भृङ्गराजं यावत् पञ्चमी, तथा अदितिस्थानात् सुग्रीवस्थानं यावत् अन्तिमा षष्ठी रेखा कार्या। एवम् एकाशीतिवास्तुपदचक्रे वंशानयनं प्रायः समेषु ग्रन्थेषु अभिहितमस्ति। एवमेव चतुष्षष्टिवास्तुपदचक्रे रोगाद्वायुपर्यन्तं तथा पितृस्थानात् अग्निपर्यन्तं वंशाद्वयानयनं विधेयम्। तथैव वास्तुविद्यायां भट्टोत्पलः -

रोगाद्वायुं नयेत् सूत्रं पितृतोऽथ हुताशनम्।

एतत्सूत्रद्वयं प्रोक्तं मुनिभिर्वंशसंज्ञितम्॥[18]

अनया रीत्या शिराभिः तथा एकाशीत्यादिवास्तुपदचक्रे आलेखितैर्वंशैः कर्णाकारसूत्रैः पूर्वापररेखायां कोष्ठेषु च यत्र तत्र सम्पातः भवति यत् रेखासम्पातस्थानं कोष्ठसम्पातस्थानञ्च वास्तुपुरुषस्य मर्मस्थानाख्येन प्रसिद्धं वर्तते। एतानि मर्मस्थानानि षण्महान्ति इति संज्ञया समराङ्गसूत्रधारे अभिहितानि सन्ति। एतानि मर्मस्थानानि गृहस्वामिना अनुत्पीडितानि स्युः। यतः वास्तुपुरुषस्य यो ममङ्गिः अशुचिभाण्डोपस्करणपाषाण कील स्तम्भनादिभिः उत्पीडितो भवति, गृहस्वामिनो स एव र्माङ्गः उत्पीडितो भविष्यति -

तान्यशुचिभण्डकीलस्तम्भाद्यैः पीडितानि।

शल्यैश्च गृहभर्तुस्तत्तुल्ये पीडामङ्गे प्रयच्छति॥

वराहेण शिरावंशयोः प्रमाणमपि निगदितं वर्तते। यथा -

पदहस्तसंख्यया सम्मितानि वंशोऽङ्गुलानि विस्तीर्णः।

वंशव्यासोऽध्यर्धः शिराप्रमाणं विनिर्दिष्टम्॥[19]

गृहस्वामिनः हस्तप्रमाणैः यावन्मितं पदं भवति तावन्मितैरङ्गुलैः वंशमानं स्थापनीयम्। किञ्च वंशव्यासप्रमाणेन सार्धैकगुणप्रमितं शिराप्रमाणं भवेत्। समराङ्गणसूत्रधारे अतिविस्तरेण शिरा-वंशानुवंश-अनुसन्धि-मर्मस्थानानां प्रमाणमुद्गीरितमस्ति। विश्वकर्मप्रकाशे नाडीनां नामान्यपि पठितानि सन्ति-

शान्ता यशोवती कान्ता विशाला प्राणवाहिनी।

सती च सुमना नन्दा सुभद्रा सुरथा तथा॥

पूर्वापरायता ह्येता..........शिराश्च परिकीर्तिता॥[20]

मत्स्यपुराणे एकाशीतिवास्तुपदनिर्माणाध्याये वास्तुपुरुषस्य विभिन्नेष्वङ्गेषु पृथक् पृथक् देवानां स्थितिः भणिता अस्ति।

मूर्द्धन्यग्निः समदिष्टो मुखे चापः समाश्रितः।

पृथिवीधरोऽर्यमा चैव स्तनयोस्तावधिष्ठितौ॥

वक्षःस्थले चापवत्सः पूजनीयः सदा बुधै।

नेत्रयोर्दितिपर्जन्यौ श्रोत्रेऽदितिजयन्तकौ॥

सर्पेन्द्रावंससंस्थौ तु .... ब्रह्मा स तु पूज्यते॥[21]

अग्निपुराण मत्स्यपुराणाद्यन्यमतयोः यदि तुलना क्रियते तर्हि किमपि मूलभूतमन्तरं नोपलभ्यते। अग्निपुराणमते, एकाशीतिवास्तुपदचक्राय यावत्यः शिराः पठिताः तावत्य एव संज्ञाल्पभेदेन समराङ्गणाद्यन्यमतेऽपि भणिताः सन्ति। अग्निपुराणमते पूर्वापरायतासु ये द्वे वसुमति मनोरमे नाड्यौ पठिते ते अन्यमते क्रमशः सुमना-सुरथा इति नाम्ना प्रसिद्धे स्तः। तथैव सौम्य-याम्याश्रितासु शिरासु अपि कश्चन शिराः नामान्तरेण परिगणितास्सन्ति। अग्नौ वर्णितासु दक्षिणोत्तरायतासु नव एव परिगणिताः सन्ति तथा अन्तिमायाः इन्द्रा इति संज्ञिकायाः शिरायाः नामोल्लेखः कदाचित् यान्त्रिकीयदोषवशान्मानवीयदोषवशाद्वा अनुपलभ्यो वर्तते। अग्निपुराणे चतुष्षष्टिवास्तुपदविन्यासाय प्रयुक्ताः नाडिकाः अपठितास्सन्ति, किन्तु विश्वकर्मप्रकाशोत्याद्यन्यमते ता अपि वर्णितास्सन्ति। अग्निपुराणे मर्मस्थापनज्ञापकानां वंशानां सङ्केतस्तु वर्तते किन्तु आनयनप्रकारोऽपठितोऽस्ति। मत्स्यपुराणाद्यन्यमते तस्यानयनप्रकारोऽपि उल्लिखितो दृश्यते।

एवमेव अग्निपुराणे वास्तुपुरुषविकल्पनप्रसङ्गे तस्य वास्तुपुरुषस्य भूमौ स्थितिस्तथा उपयोगिता वर्णिता अस्ति। किन्तु मत्स्यपुराणाद्यन्यमते वास्तुपुरुषस्य विविधाङ्गेषु विद्यमानां देवानां निर्देशः कृतो दृश्यते।

एतदतिरिक्तं समराङ्गणसूत्रधारे भोजदेवः वास्तुपुरुषावयवेषु स्थितान् षोडशवर्णाश्च लिलेख। तन्मते, मूर्धनि क्षकारः, नेत्रयोः हकारः, नासिकायां सकारः, चिबुके षकारः, कण्ठे शकारः, हृदये वकारः, नाभिदेशे लकारः, वस्तिप्रदेशे रेफः, लिङ्गे यकारः, नुष्कयोर्मकारः, ऊर्वो नकारः, जन्वोः णकारः, जङ्घयोः ञकारः, गुल्मयोः ङकारः,

ISSN 2456-3420

चरणयोः पकार इति एते षोडशवर्णाः वास्तुपुरुषस्य पृथक् पृथगवयवेषु स्थिताः सन्ति।

इत्थमग्निपुराणान्यमतयोः विषयाश्रितानि अन्तराणि अल्पानि एव किन्तु तयोर्मुख्यः भेदः विषयविस्तारात्मक एव। अतः निष्कर्षरूपेण अग्निपुराणे ज्यौतिषसम्बद्धाः केचन विषया आसन् येषां पल्लवनं शनैः शनैः ज्यौतिषग्रन्थेषु अभूवन्। तथैव कालान्तरे केषाञ्चन विषयाणां सङ्केतरूपेण अग्निपुराणे नियोजनमपि संवृत्तम्।

वास्तुदेवानां बलिदानविधिः -

अग्निपुराणे द्वयोः चत्वारिंशत् त्रिणवतितमाध्ययोः चतुष्षष्टि-वास्तुपदचक्रन्यासप्रसङ्गे तथा एकाशीतिवास्तुपदचक्रन्यासप्रकरणे वास्तुमण्डलन्यस्तदेवानां बलिदानादि विधिः वर्णितो दृश्यते। उभयोरपि अध्याययोः पृथक्-पृथक् देवतायै वर्णितबलिदानविधौ साम्यं वर्तते।

चतुष्षष्टिपदे क्षेत्रे ईशं कोणार्धसंस्थितम्।
घृताक्षतैस्तर्पयेत् तं पर्जन्यं पदगं ततः॥
उत्पलाद्भिर्जयन्तञ्च द्विपदस्थं पताकया।
महेन्द्र चैककोष्ठस्थं सर्वरक्तपदे रविम्॥
वितानेनार्धपदगं सत्यं पादे भृशं घृतैः।
व्योमशाकुनमांसेन कोणार्धपदसंस्थितम्॥
स्रुचा चार्धपदे वह्निं . . . प्रासादादीन्न कारयेत्॥

किञ्च,

साज्यमक्षतमीशाय पर्जन्यायाम्बुजोदकम्।
ददीताथ जयन्ताय पताकां कुङ्कुमो%%वलाम्॥
रत्नवारि महेन्द्राय रवौ धूम्रं वितानकम्।
सत्याय घृतगोधूममाज्यभक्तं भृशाय च॥
विमांसमन्तरिक्षाय शकुन्तेभ्यश्च पूर्ववत्।
मधुक्षीराज्यसम्पूर्णा प्रदद्याद्वह्नये स्रुचम्॥
लाजापूष्णे सुवर्णाम्बु .... सकलं वास्तुं कुशदध्यक्षतैर्जलम्॥[22]

स्थपतिः ईशाय घृतक्षतौ, पर्जन्याय जलाम्बुजौ, जयन्ताम्, कुङ्कुमयुतध्वजम्, महेन्द्रय रत्नमिश्रितपताकाम्, सूर्याय धूम्रवर्णीयं वितानम्, सत्याय घृतमिश्रितमन्नं भृशाय मापम्, व्योग्रे शाकुनमांसं तथा अग्नये मधुक्षीराज्ययुक्तं स्रुचं दद्यात्। एवमेव पूषणं लाजया, सुवर्णेन वितथम्, मधु-मंथनदण्डाभ्यां गृहक्षतम्, पलोदकेन अन्तकम्, गन्धैर्गन्धर्वम्, शाकुनजिह्वया भृङ्गराजम्, यवपर्णेन मृगं तथा कृशरया तिलमिश्रितजलेन वा पितृन अर्चयेत्। तथैव दौवारिक दान्तकाष्ठं धेनुमुद्राञ्च, सुग्रीवाय यावकं, पुष्पदन्ताय कुशस्तम्बम्, वरुणाय रक्ताम्बुजम्, असुराय सोमम्, शोषाय आज्योपेतं जलम् (ओदनं वा), पापयक्ष्मणे यवम्, तथा रोगाय घृतमण्डकान् लाजान् वा तर्पयेत्। नागाय नागपुष्पम्, मुख्याय भक्ष्यपदार्थम्, भगाय मुद्गौदनम्, सोमाय मधुपायसम्, चरकाय शालूकफलम्, अदितये लोपीं तथा दितये पूरिकां दद्यात्। क्षीरेण, पायसेन वा आपम्, दध्ना आपवत्सम्, मोदकेन मरीचिम्, रक्तपुष्पैस्सवितारम् कुशाभिस्सावित्रम्, रक्तचन्दनैर्विवस्वन्तम्, हरिद्रायुक्तान्नैरिन्द्रम्, घृतेन मिष्ठान्नेन वा इन्द्रजयम्, पयसा मित्रम्, घृतयुक्तान्नैः रुद्रम् मांसेन रुद्रदासं, मांसमाषाभ्यां महीधरं तथा पञ्चगव्येन ब्रह्माणं पूजयेत्।

समराङ्गणसूत्रधारे[23] षट्त्रिंशत्तमेऽध्याये बलिदानविधौ वास्तुमण्डलस्थदेवानां पूजनाय बलियोग्यान् पदार्थान् भोजदेवो निर्दिशति। यद्यपि अग्निपुराणे समराङ्गणसूत्रधारे च वर्णितविविधदेवेभ्यः निर्दिष्टबलिपदार्थेषु वैषम्यं दृश्यते तथापि तयोराधारभूतं साम्यं वर्तते एव। पुनश्च समराङ्गणसूत्रधारे तथा भवनादिमध्यभागे मण्डलादिनिर्माणम्, कलशस्थापनम्, ब्रह्म-गणेश-विश्वकर्मादिपूजनं निर्दिष्टं वर्तते तथैव अग्निपुराणे विस्तरेण एषा प्रक्रिया वर्णिता अस्ति।

ब्रह्मस्थाने हरिं लक्ष्मीं गणं पश्चात् समर्थयेत्॥
महीं नरं वास्तुमयं वर्धन्या सहितं घटम्।
ब्रह्माणं मध्यतः कुम्भे ब्रह्मादींश्च दिगीश्वरान्॥
दद्यात् पूर्णाहुतिं पश्चात् स्वस्तिवाच्य प्रणम्य च।
प्रगृह्य कर्करीं सम्यङ्मण्डलं तु प्रदक्षिणम्॥
सूत्रमार्गेण हे ब्रह्मन् तोयधाराञ्च भ्रामयेत्।
पूर्ववर्त्तेन मार्गेण. . . तत्तु शल्यं तदुद्भवम्।[24]

अर्थात् वास्तुमण्डलस्थेभ्यो देवेभ्यो बलिं प्रदाय ब्रह्मणः कोष्ठे हरिं लक्ष्मीं गणेशञ्च स्थपतिः पूजयेत्। ततः पृथिवीं, वास्तुपुरुषं वर्धन्या सह कलशं ब्रह्माणञ्च स्थापयेत्। तत्पश्चात् कलशस्य मध्ये ब्रह्मादिदेवान्, दिगीश्वराश्च पूर्णाहूतिं दापयेत् तथा स्वस्तिवाचनमपि कुर्यात्। ततः सरन्ध्रां कर्करीं स्वीकृत्य मण्डलं परिक्रम्य जलं पातयेत्। ततः पूर्वदिशि

ISSN 2456-3420

सप्तस्थलेषु बीजवपनं विदध्यात् तथा अभिषिक्तमार्गस्य खननमपि कुर्यात्।

• खननात् प्राप्तं हस्तप्रमाणं खातं चतुरङ्गुलैस्संलिप्य चतुर्भुजविष्णुं ध्यात्वा कुम्भतः अर्घ्यं दद्यात्। पुनश्च गर्तं प्रपूर्य गुरु-ज्योतिर्वित्-स्थपतीनां यथायोग्यं सम्मानं करणीयम्। ततः जलान्तं यावत् भूमिं खननित्वा शल्याभावे सति तस्मिन् भूमौ वास्तुनिर्माणमारम्भणीयम्।

इत्थं वास्तुपदविन्यासः वास्तुपुरुषविकल्पनम्, मर्मस्थानानि, बलिदानादिविधिरित्यादीनि यावन्ति स्थापत्यशास्त्रविहितानि कार्याणि सन्ति तावन्ति लघु-विस्तृतरूपेण अग्निपुराणे अवश्यमेव उपलभ्यमानानि सन्ति। अग्निपुराणानन्तरं वास्तुशास्त्रीय सिद्धान्तानां पगवनं शनैः - शनैः बभूव। यस्य स्पष्टप्रभावः समराङ्गणादिप्रभृतिवास्तुशास्त्रीयग्रन्थेषु दरीदृश्यते।

पादटिप्पणः

१. अ० पु०, ४०/१
२. विश्वकर्मा०, ६-१०
३. बृ० सं०, ५३/२-३; वा० सौ०, १/९-१०
४. म० पु०, २५/५-१४
५. वास्तुराज०, वास्तुसर्व०, पृष्ठः १८
६. विश्वकर्मा०, १९-२०
७. वास्तुसर्वस्वम्, पृष्ठः १८
८. म० पु०, २५२.२-७ एवं १५-१६, इमे श्लोकाः प्रासादमण्डने अष्टमाध्याये ९६-९७ क्रमे समुपलभ्यन्ते।
९. वास्तुमण्डनम्, ९०-९१
१०. बृ० सं०, ५३-२-३, उत्पलभट्टः
११. बृ० सं०, ५३/५१
१२. अ०पु, ९३/३-४
१३. अ०पु, ९३/७-८
१४. अ०पु, १०५/२-४
१५. म.पु., २५३/३४-३७
१६. सम्पाता वंशानां मध्यानि समानि यानि च पदानाम्। मर्माणि तानि विद्यान्न तानि परिपीडयेत् प्राज्ञ॥ बृ० सं०, ५२/५७
१७. बृ० सं०, ५२/६१-६२
१८. वा सौ, अष्टमोभागः श्लोकः ३०७
१९. बृ. सं. ५२/२६-३१
२०. वा सौ, अष्टमोभागः श्लोकः ३१३-३१५
२१. म. पु. २५३/३९-४६
२२. अ०पु, ४०/२-२१
२३. स०सू०, ३६/५-२६
२४. अ०पु, ४०/२२-३१

डॉ मनोजश्रीमालः, सहायकाचार्यः (संविदागत)

राष्ट्रियसंस्कृतसंस्थानम्, वेदव्यासपरिसरः, बलाहरः, काँगडा, हि.प्र.

ISSN 2456-3420

हिमाचलप्रदेशस्य पर्वतीयभाषोत्पत्तिविमर्शः

सुश्री गायत्री शर्मा

हिमाचलप्रदेशः भारतस्य उत्तरस्यां दिशि स्थितोऽस्ति। भारते नवविंशतिः राज्यानि सन्ति। यस्मिन् हिमाचलप्रदेशः, स्वगौरवाय संस्कृत्यै च विख्यातोऽस्ति। हिमाचलप्रदेशे अपि द्वादशमण्डलानि सन्ति। प्रत्येकं मण्डलस्य स्वीकीयं महत्त्वमस्ति। एतानि द्वादशमण्डलानि योजयित्वा एव राज्यं भवति। तद्राज्यम् हिमाचलप्रदेशोऽस्ति। अयं भारतस्य अष्टादशतमराज्यरूपेण 1971 तमे वर्षे श्रीमतिइन्दिरागान्धि-महाभागायाः नेतृत्वेऽभवत्। हिमाचलपदस्योत्पत्तिः हिम, अचल शब्दाभ्यां जायते। हिमस्य अर्थोऽस्ति हिमानी, अचलस्य अर्थोऽस्ति नगः। अतः हिमस्य पर्वतमेव हिमाचलः कथ्यते। हिमाचलपर्वतः केवलं पाषाणानां मृत्तिकायाश्च पर्वतो न, अपितु अयं भारतवर्षस्य आकांक्षायाः प्रतीकोऽस्ति। प्रदेशोऽयं देवभूमिः अस्ति। कृष्णभगवान् स्वयमेव कथितवान् अस्ति।

महर्षीणां भृगुरहं गिरामस्म्येकमक्षरम्।
यज्ञानां जपयज्ञोऽस्मि स्थावराणां हिमालयः।[1]

श्रीकृष्णः कथयति यत् अहं महर्षिषु भृगुः, वचनेषु ओंकारः यज्ञेषु जपयज्ञः, नगेषु च हिमालयोऽस्मि। महाकविकालिदासः हिमालयस्य महिमायाः वर्णनं इत्थं कृतवान् अस्ति।

अस्त्युत्तरस्यां दिशि देवातात्मा,
हिमालयोनाम नगाधिराजः।
पूर्वापरौ तोयनिधी वगाह्य
स्थितः पृथिव्या इव मानदण्डः।।[2]

कालिदासः हिमालयं देवतात्मा इति मनुते। जर्मनविद्वान् कथयति[3] यत् हिमालयस्य मानवस्य च जन्म सममेवाभवत्। अतः हिमालयस्य इतिहासः तथैव पुरातनः यावान् मानवजातेः। मनुस्मृतौ श्रेष्ठमानवस्य उत्पत्तेः वर्णनप्रसङ्गे उक्तमस्ति यत्-

हिमालयाभिधानोऽयं ख्यातो लोकेषु पावनः ।
अर्धयोजनविस्तारः पञ्चयोजनमायतः ।।
परिमण्डलयोर्मध्ये मेरुरुत्तमपर्वतः।
ततः सर्वा समुत्पन्ना वृत्तेयो द्विजसत्तम ।।
एरावती वितस्ता वा विशाला देविका कुहू ।
प्रस्तूतिर्यस्य विप्राणां श्रूयते भरतर्षभ।[4]

अर्थात् विश्वप्रसिद्धः पवित्रपर्वतश्रेणीहिमालयः यः विस्तारे अर्धयोजनं आयते च पञ्चयोजनं च। यः पर्वतीयक्षेत्रे मेरौमण्डलाकारे स्थितोऽस्ति। श्रेष्ठसंस्कारयुक्ताः जनाः जाता। हे भरतः। सर्वे विप्रजनाः अस्मिन् क्षेत्रे वसन्ति यत्र ईरावती, वितस्ता, विशाला, देविका, अन्याः च काश्चित् नद्यः प्रवहन्ति। ऋग्वेदः सर्वप्राचीनतमो मन्यते। मानवस्य उत्पत्त्या सह वेदानां उद्भवोऽभवत्। तत्र ऋग्वेदस्य दशममण्डलस्य तृतीयध्यास्य त्रयस्त्रिंशत्तमे सूक्ते हिमाचलस्य नदीनां वर्णनम् वर्तते। यस्मिन् विश्वामित्रेण नदीनां स्तुतिः क्रियते।

प्र पर्वतानामुशती उपस्थादश्वे इव विषिते हासमाने
गावेव शुभ्रे मातरा रिहाणे विपाट्छुतुद्री पयसा जवेते।[5]

अहं विश्वामित्रः श्रेष्ठमातुः शुतुद्र्याः समीपम् आगतवान् या सुन्दरी विशाला अस्ति। या वत्ससदृशे स्वपुत्रे स्निह्यति समुद्रं लक्ष्यीकृत्य प्रवहमाणां शुतुद्रीं विपांटसमीपमागच्छामि। एतैः प्रमाणैः ज्ञातं यत् हिमालयस्य मनुष्यस्य च जन्म एकस्मिन् काले अभवत्। मानवस्य जन्मना सार्धमेव भाषायाः आवश्यकता जायते। किं मानवस्य जन्मना सार्धमेव भाषायाः उत्पत्तिः अभवत् अथवा कालान्तरे यदा भाषायाः उत्पत्तिः अभवत् तदा सर्वप्रथमम् अत्र प्रयोगे का भाषा आसीत्। अस्मिन् विषये मतभेदः अस्ति। भाषाविशेषज्ञाः कथयन्ति यत् भारते अधुना याः भाषाः प्रचलिताः तासां मूलाधारः सा भाषाऽस्ति यां आर्यजनाः विविधसमूहेषु भारतं प्रविशन्तः स्वकीयात्मना सार्धम् आनयन्। भाषाशास्त्रिणः डॉ. सुनीतिकुमारचटर्जीमहोदयस्य मतानुसारं[6] भूमध्यसागरस्य पार्श्वे प्रोटो-ऑस्ट्रलाइड जातेः जनाः भारते आगच्छन् सन्थालगोडऽभीलकोलमुण्डानां च भाषासु एतासां भाषाणां प्रभावः अद्यापि विद्यमानोऽस्ति। डॉ. चटर्जीमहोदस्य मतानुसारेण[7] लाहौलकिन्नौरी-इत्यादिभाषासु अस्य जातेः भाषाणां काश्चन् विशेषताः विद्यमानाः सन्ति। अस्याः जातेः जनान् आर्याः 'निषादः' इति नाम्ना कथयन्ति, तदनन्तरम् भारते द्रविडजनाः आगच्छन्। द्रविडानामनन्तरं मंगोलजातिः ये चीनितिब्बतीवर्गस्य भाषाः वदन्ति स्म। परमस्य प्रभावः उत्तरभारतस्य पर्वतीयक्षेत्रपर्यन्तमेव सीमितः। अनेन प्रकारेण आर्यभाषाया सार्धं ब्राह्यतः आगतजातीनां भाषया सह सम्मेलनमभवत्। अन्यभाषाभिः

ISSN 2456-3420

सह अधिकाकालपर्यन्तम् स्थिता न अभवन्, किन्तु आर्यभाषायां तासां प्रभावः आपतितः। अस्माकं भाषासु आर्यभाषायाः विविधशब्दाः सन्ति। किम् आर्यभाषातः पूर्वमपि अत्र काऽपि भाषा आसीत्। अस्मिन् विषये विद्वांसः कथयन्ति यत् प्रारम्भे वेदानां भाषा वैदिकसंस्कृतमासीत्। तदा सामान्यजनानां लौकिकसंस्कृतभाषा प्रचलितासीत्। वैदिकसंस्कृतौ लौकिकसंस्कृतस्य प्रभुत्वं जातम्। स्वप्रभावात् अस्यामपि साहित्यरचना अभवत्। लौकिकसंस्कृतस्य विकसितसाहित्यरूपं पाणिनीय-व्याकरणस्य नियमेषु आबद्धं तदा लौकिकसंस्कृतमपि विदुषां भाषाऽभवत्। अनन्तरं परिवर्तिता भूत्वा संस्कृतभाषा प्राकृता अभवत्। अनन्तरं अस्यापि परिवर्तितरूपम् अपभ्रंशमभवत्।

परम् एकं तथ्यन्तु अवश्यमस्ति यत् याः भाषाः अद्य वयं विविधक्षेत्रेषु वदामः तासां स्वरूपमधुना एतावत् परिवर्तितम् यत् अद्य सरलं तथा च वक्तुं कठिनमस्ति। यत् अमुकभाषा कस्याः प्राचीनभाषातः प्रसूता, अस्याः शब्दाः एकेन भाषापरिवारेण सम्बद्धाः ध्वनिश्च अपरपरिवारेण सम्बद्धः। पर्वतीयभाषायाः विषये उल्लेखनीयं मतमस्ति यत् पर्वतीयभाषायामेव संस्कृतस्य शब्दाः प्राप्यन्ते ये तत्सम-तद्भवरूपेषु विद्यमानाः सन्ति।

पहाड़ी (पर्वतीय) भाषयाः अभिप्रायः-'पहाडी' शब्दस्य अर्थोऽस्ति-पर्वतीयसम्बद्धः। 'पहाडी' शब्दः अस्मिन् अर्थे द्विधा प्रयुज्यते-

प्रथमः पर्वतस्य क्षेत्रेषु निवासी, अपरः पर्वतीयक्षेत्रेषु प्रयुज्यमानाः पहाड़ीभाषाः। यत्र भाषायाः रूपे भारतस्य उत्तरस्यां हिमालये पश्चिमस्यात् जम्मुकश्मीरस्य भद्रवाहक्षेत्रात् पूर्वस्यां नेपालपर्यन्तं भाषाः 'पहाड़ी' इत्युच्यन्ते। पूर्वनेपालस्य निवासिनः 'नेपाली' गोरखा इति वा कथ्यन्ते। तथैव मध्यभागस्य निवासिनः प्रायः 'गढ़वाली' नाम्ना कथ्यन्ते परन्तु पश्चिमपर्वतस्य निवासिनः कृते 'हिमाचली' 'पहाड़ी' इत्यनेन वा नाम्ना कथ्यन्ते। हिमाचले जनाः पर्वतेषु वसन्ति अत एव ते पहाड़ीभाषां प्रयुज्यन्ते। पहाड़ी शब्दस्य नाम डॉ. ग्रियर्सनमहोदयेन सर्वप्रथमं प्रदत्तम्। अनन्तरम् अन्ये भाषावैज्ञानिकाः अपि इदमेव नाम प्रयुक्तवन्तः। परन्तु ग्रियर्सनमहोदयः किञ्चन भाषाविशेषणं पहाड़ी नाम न दत्तवान्। सः उपर्युक्तक्षेत्रे प्रयुज्यमानाः विविधभाषाः पहाडी नाम्ना कथयति। तस्य दृष्टौ 'पहाड़ी' काचिदपि विशिष्टा भाषा नाऽस्ति। अपितु सः हिमालयेन सार्धं पूर्वतः पश्चिमं प्रति उच्चार्यमाणं वर्गम् 'पहाड़ी' कथयति। अत्र डॉ. ग्रियर्सन्महोदयः निगदति-

The word Pahari means of or belonging to the mountains and is specially applied to the group of Languages, spoken in the sub-Himalayan hills extending from the Bhadrawah, north of the Punjab to the eastern parts of Nepal [8]

स्पष्टमस्ति यत् 'पहाडी' इति नाम्ना अभिप्रायः भाषा समुहेनास्ति न तु भाषाविशेषेण तथा च तस्येदं नाम भौगोलिकम् अस्ति। भाषायाः भौगोलिकदृष्ट्या वर्गीकरणं भाषावैज्ञानिकाः युक्तिसंगतं नावगच्छन्ति। अतः पौरस्त्यां पहाड़ीभाषां 'नेपाली' इति तथा मध्यपहाडीभागे 'गढ़वाली' इति कथ्यते। हिमाचलप्रदेशे पहाडीभाषायाः प्रयोगो विधीयते।[9]।

पर्वतीयभाषायाः (पहाड़ी) सम्बद्धो मतभेदः-पहाड़ीभाषायाः उत्पत्तिविषये विद्वत्सु मतभेदोऽस्ति अस्मिन् विषये द्वौ विचारौ स्तः-

1. प्रथमः केचित् विद्वांसः पर्वतीयभाषायाः सम्बद्ध-दरदपैशाचीभाषातः मन्यन्ते।
2. द्वितीयविचारोऽस्ति यत् केचन विद्वांसः पर्वतीयभाषां (पहाडी) शौरसेनीप्राकृतेन सह सम्बद्धां चेष्टन्ते।

प्रथमाधारणा डॉ. ग्रियर्सनमहोदस्य अस्ति। सः कथयति यत् पहाड़ीभाषायाः दक्षिणस्यां पंजाबीभाषायाः, पश्चिमस्यां पूर्वस्यां च हिन्दीभाषायाः भाषाक्षेत्राणि सन्ति। परन्तु पहाड़ीभांषाणां एभिः सह कोऽपि सम्बन्धः नाऽस्ति।[10] सः पहाड़ीभाषायाः आधारं दरदपैशार्ची मनुते। सः कथयति यत् वर्तमानपर्वतीयभाषाक्षेत्रे सर्वप्रथमं खशाः आगच्छन् ये मध्येशियाः भारतस्य उत्तरीयभागे आगच्छन्। तदा गुर्जरजातेः जनाः विदेशात् एतेषु क्षेत्रेषु आगच्छन् खशगुर्जरौ आर्यभाषां वदतः स्म। परन्तु सा भारतीयार्यभाषा नाऽसीत्। उत्तरीयभारते वर्तमानाः कनैताः खशाश्च एतेषां खशानां सन्ततयः सन्ति। एवं राजपूतः गुर्जरजातिसम्बद्धाः सन्ति। खशभाषां सः उत्तरीपश्चिमीक्षेत्रस्य निवसिनिः पिशाचानां भाषां पैशाचिभिः सम्बद्धां मनुते।[11] अनेन सार्धमेव ते पैशाचीभाषां शीनादरदजात्योः भाषां मनुते। यस्याः मूलकेन्द्रं कश्मीरस्य उत्तरीगिलगिटक्षेत्रमस्ति।[12] अनेन प्रकारेण ग्रियर्सन पर्वतीयभाषायाः मूलाधारः दरदपैशाची मनुते। अपरमतस्य जनाः डॉ. ग्रिर्यसन महोदयस्य मतं न स्वीकुर्वन्ति।

डॉ. उदयनारायणतिवारी भोजपुरीभाषायाः अध्ययनं कुर्वन् पर्वतीयभाषां शौरसेनीभाषातः प्रसूतां स्वीकृतवान्[13]। डॉ. भोलानाथतिवारी पहाड़ीं, पश्चिमी पहाड़ी, माध्यमिकपहाड़ी इति द्वयोः

ISSN 2456-3420

वर्गयो: विभज्य इमां हिन्दीभाषाया: पञ्च उपभाषासु एकाम् उपभाषां मनुते। परन्तु उत्पत्तेः आधारेण पहाड़ीभाषां पश्चिमीहिन्दीं राजस्थानीं-गुजरातीं-शौरसेनीभाषाभ्य: प्रसूतां मनुते[14]। डॉ. गोविन्दचातकमहोदया: मध्येपहाड़ीभाषाया: शास्त्रीयऽध्ययनप्रसङ्गे गढ़वाली उपभाषाया: विशिष्टमऽध्ययनं कृतवान्। डॉ. ग्रियर्सन, डॉ. चटर्जीमहोदययो: धारणानां प्रत्याख्यानं कुर्वन्, स: पर्वतीयभाषाणां मूलाधार: दरदखशपैशाचीप्राकृता च आसन् इति मतस्य खण्डनं करोति, मध्यपहाड़ीभाषां शौरसेनीभाषासम्बद्धां चेष्टते।[15] वस्तुत: शौरसेनी भाषाया: क्षेत्रं विस्तृंत मनुते कथयति च यत् पैशाचीवदेव शौरसेन्या: किमपि पर्वतीयं रूपम् आसीत्। यत् या पहाड़ी-उपभाषाणां मूलाधार: अभवत्। डॉ. कृष्णलालहंस: लिखति यत् शौरसेनी-अपभ्रंशात् पश्चिमीहिन्दी, राजस्थानी, गुजराती पर्वतीयभाषाणां च विकास: अभवत्। अत्र राजस्थानी, गुजराती पहाड़ीभाषा: नागर-अपभ्रशेन सह सम्बद्धा:। एतासां भाषाणां शौरसेनी-अपभ्रंशाद् विकास: तथा नागर-अपभ्रंशेन सह सम्बन्धकथनस्य अर्थोऽस्ति। यत् स: एकाम् उपभाषाम् अपरस्या: शाखां मनुते। इदं सम्यक् अपि अस्ति। पर्वतीयभाषाया: शौरसेनी-अपभ्रंशेन सम्बन्ध: डॉ. ग्रियर्सन अपि मन्यते। परन्तु स: शौरसेनीम् अस्या: मूलाधारं न मन्यते। भारतीयाधुनिकार्यभाषाणां मध्यकालिकार्यभाषाभि: सह सम्बन्धं कथयन् डॉ. ग्रियर्सन: पहाड़ीभाषां नागर-अपभ्रंशस्य आवन्त्यशाखाया: उत्पन्ना इति संकेतमपि डॉ. ग्रियर्सन: लिखति। यत् अस्य क्षेत्रस्य किमपि विशिष्टं प्राकृत-अपभ्रंशस्य ज्ञानं न अस्ति। अस्य समस्तौ पंजाबस्य उत्तरस्याम् टक्क अपभ्रंशपहाड़ीभाषा: अवश्यमेव प्रभावितवान् आसीत् तथा मध्यएशियात: आगत: गुर्जरजाति: स्वसार्थम् आर्यभाषामेव आनयत्। राजपूतानां प्रदेशानपि निष्क्रमणकारिण: आगच्छन्। एवं जनानां भाषा: मिश्रिता: अभवन्। परं मूलरूपेण पहाड़ी भाषा दरदपैशाचीत: प्रसूता[16]। मध्यकाले च एता: राज्यास्थानस्य प्राकृतेन अपभ्रशेन वा प्रभाविता इति न स्वीकरोति।

निष्कर्ष-

एवं रीत्या हिमाचलीयपर्वतीयभाषाणामुत्पत्ति: विकासश्च कथमभवत् अस्मिन् सन्दर्भे चर्चापुरस्सरं तत्र संस्कृतशब्दानां यथावत् प्रयोग: कथं जायते, कुत्रापरिवर्तनं जायते एतेषां विविधविषयाणां चर्चा इह प्रस्तुता। अत्र भाषाविवेचनक्रमे एव पर्वतीयभाषाया: महत्त्वं तत्रापि विशिष्य सांस्कृतिकदृशा हिमाचलीयस्थिति: महत्त्वस्य च व्याख्यानमत्र विहितम्। आशासे प्रकृतशोधपत्रं नूनमेव सुधीमनोरञ्जनाय ज्ञानपिपासा प्रशमनाय च भविष्यतीति निश्चप्रचम्।

पादटिप्पणी

1. श्रीमद्भगवद्गीता-10-25
2. कुमारसम्भवम्-1.1
3. सामान्य ज्ञान हिमाचल भारत व विश्व-जगमोहन बलोखरा, पृ. 2
4. पहाड़ीभाषा के विशेष सन्दर्भ में, पृ.-13
5. ऋग्वेद-3.33 विश्वामित्रनदीसंवाद:, 1.1
6. पहाड़ीभाषा-कुलुई के विशेष सन्दर्भ में, मौलू राम ठाकुर, पृ.-9
7. डॉ. सुनीति कुमार चटर्जी : इण्डो आर्यन एण्ड हिन्दी, पृ.-40
8. डॉ. ग्रियर्सन लिंग्विस्टिक सर्वे ऑफ इण्डिया- खण्ड 9 भाग 4।
9. डॉ. भोलानाथ तिवारी : भाषा विज्ञान कोश, पृ. 89।
10. डॉ. ग्रियर्सन-लिंग्विस्टिक सर्वे ऑफ इण्डिया, खण्ड 9 भाग 4, पृ. 2
11. लिंग्विस्टिक सर्वे ऑफ इण्डिया, खण्ड 9 भाग-4, पृ-2
12. डॉ. ग्रियर्सन: पिशाच लेग्वेंजिज ऑफ नार्थ वेस्टर्न इण्डिया, पृ 2-3
13. डॉ. उदय नारायण तिवारी : भोजपुरी भाषा और साहित्य, पृ. 17।
14. डॉ. भोलानाथ तिवारी, भाषाविज्ञान कोश, पृ. 736 तथा 89।
15. डॉ गोविन्द चातक : मध्य पहाड़ी का भाषा शास्त्रीय अध्ययन, पृ. 37, 34।
16. भारत का भाषा सर्वेक्षण:-डॉ. उदयनारायण तिवारी का अनुवाद, पृ. 249।

सन्दर्भग्रन्थसूची

1. श्रीमद्भगवद्गीता। 2. कुमारसम्भवम्।
3. सामान्य ज्ञान हिमाचल भारत व विश्व।
4. ऋग्वेद।
5. पहाड़ी भाषा-कुलुई के विशेष सन्दर्भ में।
6. इण्डो आर्यन एण्ड हिन्दी।
7. लिंग्विस्टिक सर्वे ऑफ इण्डिया।
8. भाषा विज्ञान कोश।
9. पिशाच लेग्वेंजिज ऑफ नार्थ वेस्टर्न इण्डिया।
10. भोजपुरी भाषा और साहित्य। 11. भाषा विज्ञान कोश।
12. मध्य पहाड़ी का भाषा शास्त्रीय अध्ययन।
13. भारत का भाषा सर्वेक्षण।

सुश्री गायत्री शर्मा, शोधच्छात्रा

राष्ट्रियसंस्कृतसंस्थानम्, वेदव्यासपरिसर:, बलाहर: (हि. प्र.)

ISSN 2456-3420

ज्योतिषशास्त्रस्याज्ञातकालः

श्री हेमन्तकुमारः

गगनमण्डलस्थदीप्तपिण्डान्येव ज्योतिरिति संज्ञया संज्ञितानि। तेषु कानिचित् ग्रहसंज्ञानि प्रतिदिनभिन्नगतित्वाद्, कानिचिच्च नक्षत्रसंज्ञकानि स्थिरस्थानत्वात्। तेषां ग्रहनक्षत्रादीनां गतिस्थितिपरिमाणविप्रकृष्टतादीनां विनिश्चयः यत्र क्रियते तस्य निरूपणमुपदेशो व्याख्यादयस्तथा प्रभावः जगति व्यक्तौ वाऽन्विष्यते तच्छास्त्रं ज्योतिषमिति कथ्यते। द्युत दीप्तौ[1] धातोः 'द्युतेरिसिन्नादेश्च जः'[2] इत्यनेन सूत्रेण इसिन् प्रत्यये दकारस्य जकारादेशे च कृते 'ज्योतिष' शब्दोऽयं निष्पद्यते[3]। ज्योतिः शब्दान्मत्वर्थीये ज्योतिः शब्दान्मत्वर्थीयेऽचि (अर्श आदित्वात्) व्युत्पत्त्या तदधिकृत्य कृतः ग्रन्थः ज्यौतिषः सूर्यसिद्धान्तादिः[4]। किन्तु सर्वेष्वपि प्राचीनग्रन्थेषु ज्योतिषमिति दृष्ट्वा ज्योतिषमेव विद्वद्भिरंगीकृतम्।

शास्त्रान्तरवच्छास्त्रमिदमपि कतिपयाः अवस्थाः अतिक्रम्य सन्धानानुसन्धानैरन्तर्येण तात्कालिकीमवस्थां प्राप्तम्। आकाशं प्रति दृष्टिपातेनास्माकमर्थान्मनुष्याणां मनसि स्वाभाविकी जिज्ञासा संजायते यत् ग्रहनक्षत्रादीनि किं वस्तु? सूर्योदयः पूर्वस्यामस्तं च पश्चिमायां केन कारणेन भवति? कस्माद्धेतोः ऋतुप्रवृत्तिः? जिज्ञासा = ज्ञातुमिच्छैव नूतनज्ञानस्य जनकत्वे कारणम्। एवमेवाज्ञातकाले प्राग्वैदिककाले वा मानवस्य जिज्ञासैवास्य शास्त्रस्य प्रादुर्भावे कारणम्। जिज्ञासाऽऽवश्यकता वा साध्यस्य सिद्धिहेतुः। अनादिकालादेव पशुवदपि मनुष्योऽपि दिनरात्र्ययनर्तुत्वादिविषये स्वल्पमपि जानाति स्म। कालक्रमेण तच्चिन्तनजनितानुभवोपचितेन ज्ञानेनानेन शास्त्रेण स्वरूपं गृहीतं तदेव ज्ञानं परम्परां प्राप्य वैदिककाले संहितास्वितस्ततः दृश्यते। नूतनानुभवसंयोजनपूर्वकमिदं ब्राह्मणादिषूपवर्णितं तथा च शनैः-शनैः पृथच्छास्त्रत्वेनाविर्भावं संजातम्। इदमित्थमिति निश्चितरूपेण वयं किंचिद्वक्तुं न पारयामः। तथापि ज्योतिषशास्त्रेतिहासकारैः यद् स्वकीयग्रन्थेषु प्रतिपादितं तदत्र साररूपेण वर्णयामः। कालवर्गीकरणदृष्ट्या शास्त्रमिदं पंचस्ववस्थासु विभक्तं दृश्यते; तत्राचार्यलोकमणिदाहालेन[5]-1. प्राग्वैदिककालः, 2. वैदिककालः, 3. वेदांगकालः, 4. सिद्धान्तकालः, 5. आधुनिककालश्चेति। अथवा 1. अज्ञातकालः, 2. आदिकालः, 3. पूर्वमध्यकालः, 4. उत्तरमध्यकालः, 5. आधुनिककालश्च। डॉ. नेमिचन्दशास्त्रिणा महोदयेनास्य शास्त्रस्य विकासक्रमः षड्धा विभक्त[6]; तद्यथा- 1. अन्धकारकालः ईशवीयपूर्वतः 10000 वर्षाणि, 2. उदयकालः 10001 ई. पू. - 500 ई. पू. यावत्, 3. आदिकालः 501 ई. पू. - 500 ईस्वीं यावत्, 4. पूर्वमध्यकालः 501 ई. - 1000 ई. यावत्, 5. उत्तरमध्यकालः 1001 ई.-1600 ई. यावत्,-6. आधुनिककालोऽर्वाचीनकालो वा 1601 ई.-1951 ई. यावत्।

तत्राद्यो कालः प्राग्वैदिककालः अज्ञातकालः अन्धकराकालो वा प्रोक्तः। न ज्ञातः अज्ञातः, तत्कालविषये नाधिकं जानीमः तज्ज्ञानाभावात्। किन्तु पौराणिकाख्यानैः तच्चिन्तनं करिष्यामः। सृष्टेर्विकासेन सहास्य प्रादुर्भावोऽपि प्रारभत। कल्पारम्भे प्रत्येकमहायुगारम्भे प्रत्येकयुगपादारम्भे च सर्वेऽपि ग्रहा एकत्रासन्नाः। ततः सृष्ट्यादितः सर्वे स्वस्वकक्षायामनवरतरूपेण भ्रमन्ति। उक्तं चापि भास्कराचार्येण-

सृष्ट्वा भचक्रं कमलोद्भवेन ग्रहैः सहैतद्भगणादिसंस्थैः।
शश्वद्भ्रमे विश्वसृजा नियुक्तं तदन्ततारे च तथा ध्रुवत्वे।।

अर्थात् सृष्ट्यादौ ब्रह्मणा भचक्रं सग्रहं विरचय्याकाशे मेषमुखेऽश्विन्यादौ निवेशितमनवरतभ्रमणे च नियुक्तम्। तानि भानि प्राग्संस्थया समनिवेशितानि। अत्र भूमध्ये सूत्रस्यैकमग्रं बद्ध्वा द्वितीयमग्रं भचक्रेऽश्विनीमुखे किल निबद्धम्। तस्मिन् सूत्रे प्रोता मणय इव चन्द्रादयो ग्रहाः सृष्ट्यादौ ब्रह्मणा निवेशिताः। तात्पर्यमिदमस्ति यत्सर्वे ग्रहाः सृष्ट्यादावेकस्मिन् राशौ स्थिताः भवन्ति।

प्राग्वैदिककालोऽज्ञातकालोऽन्धकारकालो वाऽस्माकं प्रतिपाद्य विवेच्य विषयो वा। कालोऽयं प्राचीनतमः, वेदमन्त्रसंग्रहादपि प्राचीनतरः। भाषाराहित्यात्पश्चाच्च लिप्यभावादस्य कालस्य साहित्याभावाद्वयमिदमित्थमिति रूपेण किंचिदपि वक्तुं न शक्नुमः। अस्माकं तज्ज्ञानाविषयत्वात्। किन्तु वयमेतद्वक्तुं पारयामः यत्तदा ज्योतिषशास्त्रविषयकस्वल्पं ज्ञानमवश्यमेवासीत्। वेदानामखिलविद्यानां बीजत्वात्तत्र वर्णिततत्त्वाधारेणेदं स्पष्टं यत्तदा शास्त्रमिदं सुसमृद्धमासीत्। अनेकस्थाने सूर्यचन्द्रनक्षत्रतारामासर्तुसंवत्सरादीनां यद्वर्णनं समुपलभ्यते तत्पूर्वमौखिकज्ञानस्यैव साहित्यिकरूपम्। अज्ञातकालविषयकजैनमतमपि स्वकीयं महत्त्वमादधाति। जैनपरिकल्पनानुसारेणानादिकालादेव

ISSN 2456-3420

जगदेवमेव प्रचलति, न किंचिदुत्पद्यते न विनश्यति। वस्तुन: पर्यायपरिवर्तनं केवलम्। स्वयंसिद्धसंसारस्य कर्तृत्वापेक्षाभावात्। किन्त्वैरावतभरतक्षेत्रावसर्पणकालान्ते खण्डप्रयत्वाद् किन्तु पुण्यात्मनां विजयार्द्धगुहासु निलीनत्वात्तद्व्यतिरिक्तजीवा: विनश्यन्ति। दु:खमादु:खमानामोत्सर्पणाद्यकाले जलदुग्धघृतवृष्टे: प्रभावात्पृथ्वी स्निग्धात: निवासयोग्या संजायते। येनावशिष्टा: जीवा: पुन: संसरन्ति। विंशति: कोड़कोड्यद्धासागरात्मक: कल्प:। तस्यापि द्वैविध्यम्-अवसर्पणमुत्सर्पणं च। सुषमसुषम-सुषम-सुषमदु:सम-दु:समसुषम-दु:सम-दु:समदु:समभेदेनावसर्पणस्य षड्विधत्वमुक्तमुत्सर्पणस्य च वैपरीत्ये-नार्थाद्दु:समदु: सम-दु:सम-दु:समसुषम-सुषमदु:सम-सुषम-सुषमसुषमाभिधेया: षड्भेदा:। सुषमसुषमश्चत्वार: कोड़ाकोड़ीसागर-प्रमाणात्मक:, त्रय: सुषम:, सुषमदु:समस्य द्वौ, दु:समसुषमस्य द्विचत्वारिंशद्सहस्रोनमेककोड़ाकोड़ीसागरात्, दु:समस्यैकविंशति: सहस्रम्, दु:समदु:समस्य चाप्येकविंशतिसहस्रमेव। प्रथमे द्वितीये च काले भोगभूमेसृष्टे:, तृतीयकालादौ भोगभूमेरन्ते च कर्मभूमेसृष्टि: भवति। अस्मिन्नेव तृतीयकालावसाने चतुर्दशकुलकरा: समुत्पद्यन्ते भिन्नभिन्नशिक्षाप्रदानार्थम्। प्रथमकुलकरप्रतिश्रुतिकाले मानवै: सूर्यचन्द्रसम्बन्धिज्योतिषविषयकज्ञानं तेन कुलकरेण प्रतिपादितम्। तेन ज्ञानेन ते स्वकार्ये सँल्लग्ना: बभूवु:। तत: द्वितीयेन कुलकरेण नक्षत्रखगोलादिविषयकज्ञानं प्रदश्रम्। अनेनेदं सिद्धं यत्कल्पारम्भेऽपि शास्त्रमिदं विद्यमानमासीत्[7]। प्राग्वैदिककाले एते विषया: मौखिक-रूपेणावश्यमेव प्रचलिता: आसन्। यद्यपि लौकिकालौकिकसमस्त-विद्यानामनादित्वं स्वत: सिद्धम्। यतो हि परामत्मनां परमात्मा, प्रभूनां प्रभु:, परमेश्वराणां परमेश्वर: एव शून्यात् शक्तेर्वा परतर: निराकार-निर्विकारसर्वेशसर्वाधारकालातीतज्ञानातीतव्योमतीतत्त्वातीतादिभि-रभिधानैरभिहित: स एवानादिरनन्त: शाश्वत: सनातनश्च तस्यैव शक्तिरव्यक्तसंज्ञका प्रोक्ता। तस्यैव समस्तप्रपंचहेतुत्वादनादित्वाच्च सर्वासां विद्यानामप्यनादित्वं सिद्ध्यति। 'तान्यहं वेद सर्वाणि'[8] 'अव्यक्ताद्व्यक्तय: सर्वे प्रभवन्त्यहरागमे'[9] इत्यादिवचनै:। कल्पादौ योगस्य ज्ञानं भगवता श्रीकृष्णेन सूर्याय प्रदत्तम्; तस्य च ज्योतिषशास्त्रप्रादुर्भाव-हेतुत्वादनादित्वाच्च सर्वासां विद्यानामप्यनादित्वं सिद्ध्यति; 'तान्यहं वेद सर्वाणि'[10] 'अव्यक्ताद्व्यक्तय: सर्वा:' इत्यादिवचनै:। कल्पादौ योगस्य ज्ञानं भगवता श्रीकृष्णेन सूर्याय प्रदत्तं तस्य च ज्योतिषशास्त्रप्रादुर्भावहेतुत्वाद्। यद्यपि योगविषयकोक्तिरियम्। योगिन: स्वपिण्डे एव ब्रह्माण्डस्य दर्शनं प्रसिद्धमेव 'यत्पिण्डे तत्ब्रह्माण्डे' इत्युक्तत्वात्। किमपि शास्त्रं नूतनं नास्ति सर्वेषां परम्पराप्राप्तत्वात्तेषां विनष्टत्वे पुनश्चोत्पन्नत्वे कारणमत्रेश्वर एव। योगप्रयोगवादत्वेन द्वैविध्यादस्याज्ञातकाले योगवादत्वं पश्चादर्थाद्वैदिककाले प्रयोगवादत्वमारब्ध:। प्रयोगवादारभ्य शास्त्रमिदं लेखनविषयीकृतम्। आंशिकरूपेण वैदिकसाहित्ये प्रस्फुटितं विस्तृतरूपेण च वेदांगकालादेव।

पादटिप्पणी

1. लघुसिद्धान्तकौमुदी भ्वादिगण 3 ।1 ।17
2. सिद्धान्तकौमुदी, उणादिसूत्रम्- 275
3. लघुमध्यपाराशरी भूमिका, 7 पृ.
4. भारतीयज्योतिषस्येतिहास: 3 पृ.
5. भारतीयज्योतिषशास्त्रस्येतिहास: 5 पृ.
6. भारतीयज्योतिष 42 पृ.
7. भारतीय ज्योतिष 45-46 पृ.
8. श्रीमद्भगवतगीता 4 अध्याय:, 5 श्लोक:
9. तत्रैव 8 ।18
10. तत्रैव 4 ।5

श्री हेमन्तकुमार:, शोधच्छात्र:

राष्ट्रियसंस्कृतसंस्थानम्, वेदव्यासपरिसर:, बलाहर: (हि. प्र.)

ISSN 2456-3420

ज्योतिषशास्त्रे ग्रहगतीनां माध्यमेन व्यवहारिककालज्ञानम्

डॉ. शिवकुमारः

प्रस्तावना-अस्य संसारस्य सम्पूर्णमपि व्यवहारं समयाधारितं वर्तते। कालज्ञानं विना संसारे कस्यापि कार्यस्य आरम्भावसानज्ञानाभावात् किमपि व्यवस्थितं न भविष्यति। कालज्ञानेनैव वृक्षाणाम्, वनस्पतीनाम्, सूर्यचन्द्रादीनामाकाशीयपिण्डानाम्, यक्ष-गन्धर्व-राक्षस-जीवानाञ्च आयोरकलनं जायते। कालेनैव संसारस्य सम्पूर्णमपि क्रियाकलापं व्यवस्थितरीत्या प्रचलति। कालज्ञानेनैव व्यतीतकाले कृतानां कार्याणामाकलनम् , वर्तमानकार्याणां क्रियान्वयनम्, भविष्यकालिक-कार्याणाञ्च योजना निर्मीयते। अतः अस्माकं प्राचीनाचार्यैः महतापरि-श्रमेणास्यादृश्यरुपकालस्य गणना ग्रहाणां गत्याधारेण कृता वर्तते। यथा-अदृश्यरुपाः कालस्य मूर्तयो भगणाश्रिताः[1]।। एवं ग्रहाणां गत्याकलनेनैव त्रुट्यादितः प्रलयान्तं यावत् समयस्य गणना आचार्यैः कृतास्ति। ग्रहाणां भिन्न-भिन्नगतिवशात् कालमानान्यपि भिन्नानि भवन्ति। तेषु सौर-सावन-चान्द्र-नाक्षत्राण्येव मुख्यतया मानवाणां व्यवहारे प्रयुज्यन्ते।

विषयप्रवेशः-भारतीय ज्योतिषशास्त्रे ग्रहगतिसाकमेवगण-नात्मककालस्य प्रवृत्तिरुक्तावर्तते। भचक्रचलनंकालविनिगमकपरम्। तद्यथा:-

ततोऽपराशाभिमुखं भपंजरे सखेचरे शीघ्रतरेभ्रमत्यपि।
तदल्पगत्येन्द्रदिशं नभश्चराश्चरन्ति नीचोच्चतरात्मवर्त्मसु।।[2]

भचक्रचलनेनैवस्पष्टतया ज्ञायते यत् समकालमुदितयोर्ग्रहनक्षत्रयोः तुल्यागतिर्नास्ति। यतोहि नक्षत्रोदयानन्तरमेवग्रहोदयदर्शनाद् ग्रहस्य पूर्वाभिमुखचलनं समुत्पद्यते। ग्रहाणां पूर्वाभिमुखगत्यैवकालस्य वास्तविकं ज्ञानं भवति। परं प्रवाहहतभचक्रस्य नित्यमनवरतं चलितत्वात् कदा कालस्य प्रवृत्तिः कदा वा निवृत्तिरिति निश्चयेन न वक्तुं शक्यते। अतोऽत्र कालस्यानाद्यनन्तत्वकथनं समुचितमेव। अत एव ''लोकाना-मन्तकृत् कालः।''[3]

कालस्य प्रवृत्तिप्रलयौ यावुक्तौ तौ तु पार्थिवजीवाभिप्रायेणैव ग्राह्यौ। इतिनिश्चयाऽनन्तरं ,सूर्योदयदर्शनात् यथास्माकंदिनप्रवृत्तिस्तथैव प्राकृतिकप्रलयाऽनन्तरंप्रजायाः स्रजनात् सुप्तोत्थिताया इवतस्याः सूर्यादीनांप्रथमसन्दर्शनात् तासां-सृष्टिकालप्रवृत्तिः स्यात्। अत एवः-

लङ्कानगर्यामुदयाच्च भानोस्तस्यैववारेप्रथमंबभूव।
मधौः सितादेर्दिनमासवर्षयुगादिकानां युगपत् प्रवृत्तिः।।[4]

अत्र स्पष्टमस्तियल्लङ्कायां प्रथमसूर्यस्य दर्शनादेवकालगणनायाः प्रारम्भोबभूव। भारतीयज्योतिषशास्त्रे सृष्ट्यादितः प्रलयपर्यन्तकालस्य गणना त्रुट्यादीनांविविधकालमानानांमाध्यमेनैवभवति। तानिकालमानानि च ग्रहगत्याश्रितानिसन्ति। एषुकालमानेषुसौरसावनचान्द्रनाक्षत्रमानैरेव-लोकेमानवानां व्यवहारः प्रचलति। तद्यथा:- ''मानैश्चतुर्भिव्यवहार-वृत्तेः।''[5] एषांचतुर्विधकालमानानांवास्तविकज्ञानाय सूर्यचान्द्रनक्षत्रादीनां-स्पष्टगतेः ज्ञानमावश्यकं वर्तते। एषांसूर्यचान्द्रादीनांगत्यवलोकनेनैवलौके-कालव्यवहारः प्रचलति। एषुकालमानेषुनाक्षत्रकालमानंसर्वदैव-तुल्यंभवति। अतः सर्वेषामपिकालमानानांमुख्याधारः नाक्षत्रकालमेव-वर्तते। अतोनाक्षत्रकालमानम् प्रथमंप्रस्तूयते।

1. नाक्षत्रकालमानम्-एकस्य कस्यचिन्नक्षत्रस्योदयाऽन-न्तरंपुनः तस्योदयं यावद्यः कालखण्डः तन्नाक्षत्रमहोरात्रं भवति। अपिचोक्तम्- ''भवासरस्तुभभ्रमः।''[6] ''नाडीषष्ट्या तुनाक्षत्रमहोरात्रम्''[7] इतिसूर्यसिद्धान्तवचनानुसारंतस्मिन्नाक्षत्राहोरात्रे षष्टि घट्यः भवन्ति। अत्र नाक्षत्रषष्टिघटीनांज्ञान नक्षत्राणां भ्रमणेनैवभवति। अतोकालमानमिदंना-क्षत्रगत्याधारितंवर्तते। अपि च-''भचक्रभ्रमणंनित्यंनाक्षत्रं दिनमच्यते।'' पूर्णिमायांचन्द्रः यस्मिन् नक्षत्रे भवतितन्नाम्नैवमासः ज्ञायते।

2. सौरमानम्-सृष्ट्यादौचलस्थिरमेषावेकस्मिन्नेवबिन्दावास्ताम्। तदा तत्रैव रविः। ततोऽनन्तरंरविः क्रान्तिवृत्तगत्यापूर्वतोगच्छन् यदापुनः स्थिरमेषादौसमायातितदातस्यैकाभगणपूर्तिर्जाता। इदमेवरविवर्षंभवति। अपि च -''रवेश्चक्रभागोऽर्कवर्षंप्रदिष्टम्।''[8] क्रान्तिवृत्तस्य तुल्यद्वादशभागाः राशयः भवन्ति। सूर्यकेन्द्रबिन्दोः राशिप्रवेशकालस्य नामसंक्रान्तिरिति। अत एव एकस्मात्संक्रान्तेः द्वितीयासंक्रान्तिं यावत् कालखण्डः सौरमासोभवति। तथोक्तंचापि- ''संक्रान्त्यासौरउच्यते।''[9] एकस्याः राशेः तुल्यत्रिंशद्भागा अंशनाम्नाज्ञायन्ते। सूर्यस्यैकांशभोग-कालश्चसौरदिनंकथ्यते। एवंस्पष्टमस्ति यत् सौरदिनमासवर्षादीनांज्ञानं-सूर्यस्य प्रत्यक्षगत्यैवभवति। यदासूर्यस्य स्पष्टगतिरधिकातदासौरदिन-मल्पं तथा च यदा सूर्यस्य गतिरल्पा तदासौरदिनंदीर्घभवति। यस्मिन्

मासे सूर्यस्य स्पष्टगतिरधिका तदामास: लघुर्भवति। यस्मिन् मासेसूर्यस्य गतिरल्पातदामास: दीर्घोभवति। एतस्य ज्ञानंसूर्यस्यगत्याप्रत्यक्षवेधेनैव-भवति। 'दिनरात्रिमानम् संक्रान्तिमानम् उतरायणदक्षिणायनयो: ज्ञानम् दक्षिणोत्तरगोलस्य च ज्ञानंसौरमानेनैवभवति।''[10]

3. चान्द्रमानम्-चान्द्रमानस्य ज्ञानंसूर्यचन्द्रयो: गत्यन्तरेण-भवति। 'दर्श: सूर्येन्दुसङ्गम:' इतिभास्करवचनानुसारं अमावास्यायांसूर्य-चन्द्रयोराश्यंशकलाभि: तुल्यौ भवत:। अनन्तरंपूर्वाभि-मुखंगम्यमानेषुसूर्यचन्द्रेषु यदा द्वादशांशात्मकमन्तरंभवतितदैव-तिथिर्भवति। तिथिनामचान्द्रंदिनम्। एवंक्रमेणचन्द्रार्कयो: युतिकालाद् पुनर्युतिकालपर्यन्तमन्तरांशा: 360 मिता: भवन्ति। अत एव तेष्वन्तरांशेषु 360 × 12=30 तिथय: भवन्ति। स च काल: चान्द्रमासोभवति।

तद्यथा-**रवीन्द्वोर्युतेः संयुतिर्यावदन्याविधोर्मास एतच्चपैत्रं द्युरात्रम्।।**[11]

अत्र अमान्तादग्रेतयो: 12 भागान्तरांशं यावत्प्रतिपत्तिथि: 24 अंशान्तरं यावद् द्वितीयातिथि: एवमेवक्रमेण 180 अंशान्तरेपूर्णिमाभवति। एवंतिथ्यादीनांज्ञानंसूर्यचन्द्रयो: गत्यन्तरमाध्यमेनजायते। तिथि-करण-विवाह-क्षौर-जातकर्म-व्रतोपवास-यात्रादीनांविचार: चान्द्रमानेनैव-भवति।

4. सावनमानम्-एकस्मात् सूर्योदयात् पुन: तस्योदयं यावद्य: कालखण्डोभवतितत्सावनदिननाम्नाज्ञायते। तद्यथा- ''इनोदयद्वयान्तरं-तदर्कसावनंदिनम्।''[12] एतस्य कालस्य ज्ञानंनाक्षत्रषष्टिघटीषु नक्षत्रोदयात् सूर्योदयं यावत् कालखण्डस्य योजनेनभवति। एवमर्कोदयै: सावनमानस्य ज्ञानंभवति। अपि च- ''सावनोऽर्कोदयैस्तथा।'' एवमस्य कालस्य ज्ञानाय नक्षत्राणांभ्रमणकालस्य सूर्यस्य गतितुल्यकालस्य च ज्ञानमपेक्षितंवर्तते। यदोच्चस्थानेसूर्यस्य गतिरल्पाभवतितदासावनदिन-मानंअधिकं यदा च नीचस्थानेसूर्यगतिराधिकातदासावनदिनमान-मल्पंभवति। अत: सूर्यस्य गतौविविधतावशाद् सावनदिनमानंसर्वदातुल्यं न भवति। यज्ञकाल-सूतक-दिन-मास-वर्षादीनांज्ञानमनेनैवभवति।[13]

एवमत्रलिखितकालमानानां अध्ययनेनस्पष्टमस्ति यत् लोकेप्रचलितानांकालमानानांमुख्याधारा: सूर्यचन्द्रादीनांखगोली-यपिण्डानांगतय: सन्ति। तेषांगतीनांवास्तविकज्ञानेनैवसम्यक् कालस्य ज्ञानंजायते। यतोहि एषांमाध्यमेनैवलोकेव्यवहार: भवति। तद्यथा-

वर्षायनर्तुयुगपूर्वकमत्र सौरात् मासास्तथा च तिथयस्तु-हिनांशुमानात्। यत् कृच्छ्रसूतकचिकित्सितवासराद्यंतत् सावनाच्च घटिकादिकमार्क्षमानात्।।[14]

अपि च-''**चतुर्भिर्व्यवहारोऽत्र सौरचान्द्रार्क्षसावनैः।**''[15]

निष्कर्ष:-स्पष्टमस्ति यद्व्यवहारिककालमानानांवास्तविकज्ञानाय ग्रहगतीनांज्ञानमावश्यकं वर्तते। ग्रहगतीनांवास्तविकज्ञानंसूर्यचन्द्रादीनां खगोलीयपिण्डानांवास्तविकस्पष्टस्थिते: ज्ञानेनैवभवति। ग्रहगती-नांवास्तविकज्ञानंबिनावास्तविककालज्ञानमसंभवमेव। संसारेप्रचलिता-निसर्वाण्यपि कालमानानिस्पष्टग्रहगत्याश्रितानि एव सन्ति। अत: व्यवहारिककालज्ञानार्थं ग्रहगतीनां निरन्तरवेधं परमावश्यकं वर्तते।

पादटिप्पणी

1. सूर्यसिद्धान्त दृ स्पष्टाधिकार: श्लोक-2
2. सिद्धान्तशिरोमणि:-मध्यमाधिकारे, कालमानाध्याय: श्लो.-14
3. सूर्यसिद्धान्त: -मध्यमाधिर: श्लो. 10
4. सिद्धान्तशिरोमणि: -मध्यमाधिकारे, कालमानाध्याय:, श्लो.-15
5. सिद्धान्तशिरोमणि:-मध्यमाधिकारे, कालमानाध्याय:, श्लो. - 30
6. सिद्धान्तशिरोमणि:-मध्यमाधिकारे, कालमानाध्याय:, श्लो. - 20
7. सूर्यसिद्धान्त:- मध्यमाधिकारे, श्लो.-12 सूर्यसिद्धान्त:-मानाध्याय:, श्लो.-15
8. सिद्धान्तशिरोमणि:- मध्यमाधिकारे, कालमानाध्याय:, श्लो. - 1
9. सूर्यसिद्धान्त:- मध्यमाधिकारे, श्लो.-13
10. सिद्धान्तशिरोमणि:-मध्यमाधिकारे, कालमानाध्याय:, श्लो. - 1
11. सिद्धान्तशिरोमणि:- मध्यमाधिकारे, कालमानाध्याय:, श्लो.-20, 2 सू.सि.-मानाध्याय: श्लो.-13
12. सूर्यसिद्धान्त:- मध्यमाधिकारे, श्लो.-12
13. सिद्धान्तशिरोमणि:-मध्यमाधिकारे, कालमानाध्याय:, श्लो. - 31
14. सिद्धान्तशिरोमणि:-मध्यमाधिकारे, कालमानाध्याय:,
15. सूर्यसिद्धान्त:-मानाध्याय:, श्लो.-2

डॉ. शिवकुमार:, पूर्वशोधच्छात्र:

राष्ट्रियसंस्कृतसंस्थानम्, वेदव्यासपरिसर:, बलाहर: (हि. प्र.)

ISSN 2456-3420

दृग्गणितस्य प्रामाण्यम्

श्री राधाकृष्णः बि.

सूर्यादीनां ग्रहाणाम्, अश्विन्यादिनक्षत्राणां, सञ्चारः, ग्रहणं, परिभ्रमण **कालः, स्थितिः** इत्यादयः गणित-फलितरूपेण यस्मिन् शास्त्रे निरूप्यन्ते **तच्छास्त्रं ज्योतिषम्** । वेदाङ्गेष्वन्यतममिदं शास्त्रं वर्तते। वेद-वेदाङ्गानां मध्ये व्यत्यासोऽपि दरीदृश्यते। वेदाः अपौरुषेयाः वेदाङ्गानि पौरुषेयानि। **वेदास्तु** नित्याः वेदाङ्गानि कालभेदेन संस्कृतानि। 3000 वर्ष प्राक्तन इतिहासभूतमिदं ज्योतिषं शास्त्रं वेदस्य यथा षडङ्गानि सन्ति तथैव षडङ्गेन युक्तः। स्कन्धत्रयात्मकेन अस्य स्वरूपःदृश्यते। तत्र आर्यभटादारभ्य (पञ्चमशतमान) वेङ्कटेश केतकर् (19 शतमान) पर्यन्तं संस्कारेण प्रखरीभूतमिदं शास्त्रं वेद आगमेषु विद्यमानंप्रमेयमस्तितेषां प्रमेयरूपेण निरूपितम्। तत्रापि प्रत्यक्षमेव प्रमाणम् इति तत्त्वप्रकाशिका-कारेण उल्लिखितं यथा-

अप्रत्यक्षाणि शास्त्राणि विवादास्तेषु केवलम्।

प्रत्यक्षं ज्योतिषं शास्त्रं चन्द्रार्कौ यत्र साक्षिणौ॥

किमर्थं प्रत्यक्षत्वं निरूपितं चेत् सर्वे ग्रहाः प्रत्यक्षस्वरूपेण गोचराः। तद्वशात् शास्त्रस्य निरूपणं भवति। जातकं-गोलः-निमित्तं-प्रश्नः-मुहूर्तं-गणितम् इति अङ्गेन युक्तः सिद्धान्तः-संहिता-होरा इति स्कन्धत्रयेणाऽपि प्रसिद्धः। जातक-प्रश्न-मुहूर्ताः होरास्कन्धे, गोलगणितौ गणितस्कन्धे अन्तर्भवन्ति।

प्रमाणं फलभेदेन द्विविधं च भवेदिदम्।

प्रमाणं गणितस्कन्धः स्कन्धावन्यौ फलात्मकौ॥

(प्र.मा.1/9)

सिद्धान्तसंहिताहोरा इति त्रिधावस्थितेऽस्मिन् स्कन्धे गणितस्तु प्रमाणतया अन्यौ स्कन्धौ फलात्मकौ इति प्राचीनैः उक्तम्।

लगधमुनेः ''वेदाङ्गज्योतिषम्'' गणितग्रन्थः प्राचीनगणितग्रन्थः (क्रि.पू.1200)। तदनन्तरं पञ्चसिद्धान्ताः प्रसिद्धाः।

'ब्राह्मसौरश्च वासिष्ठो रोमशः पौलिशस्तथा॥' इति।

ब्रह्मरोमशसिद्धान्तौ स्पष्टौ, सूर्यसिद्धान्तः स्पष्टतमः, अन्यौ अस्पष्टौ इति वराहमिहिराचार्यः स्वीयेपञ्चसिद्धान्तिकाग्रन्थे कथितः। अत्र आर्षग्रन्थः सूर्यसिद्धान्तः स्पष्टतमः तथैव उत्तमग्रन्थः। परन्तु अद्यतनकाले तदुक्तप्रकारेण गणितं कुर्वन्ति चेत् ग्रहाणां प्रत्यक्षं गणितोक्तरीत्या यल्लब्धं तत् स्थाने वेधेन ग्रहाः न दृश्यन्ते। अतः कालभेदेन तत्काले सएव ग्रन्थः स्पष्टः। आर्यभटः, तथैव ब्रह्मगुप्तस्य ब्रह्मस्पुटसिद्धान्तः, लल्लाचार्यस्य शिष्यधीवृद्धितन्त्रम्, मुञ्जालस्य लघुमानसम्, भास्करस्य सिद्धान्तशिरोमणिः, गणेशस्य ग्रहलाघवम् एते प्राचीनाः ज्योतिषग्रन्थाः।

अनन्तरं कालभेदेन वेध-गणितयोर्मध्ये एकत्वप्राप्त्यर्थं तत्र गणितस्कन्धे केचन संस्काराः नवीनैः उपनिबद्धाः। कालस्य कारणत्वात् प्राचीनग्रन्थाः अस्पष्टतामवाप्नुयुः। नवीनानां सूर्यप्रकाशतुल्य ग्रन्थप्रकाशनेन प्राचीनग्रन्थाः नामावशेषरूपेण दरीदृश्यन्ते। किन्तु नवीनान् प्रति प्राचीनाः एव सोपानानि। अभिनवगुप्तस्य श्लोकः स्मर्यते-

ऊर्ध्वोर्ध्वमारुह्य यदर्थतत्त्वं धीः पश्यन्ति श्रान्तिमवेदयन्ती।

फलं तदाद्यैः परिकल्पितानां विवेकसोपानपरम्पराणाम्॥

इति।

एवं पूर्वोक्तगणितानाम् आधुनिकतन्त्रज्ञैः दृक्तुल्यतावाप्त्यर्थं परिष्कारः कृतः। दैवज्ञः गणेशस्य ग्रहलाघवं ग्रन्थः दृक्तुल्यत्वाभावात् वेङ्कटेश केतकर् महाभागेन केतकीग्रहणमिति संस्कारयुक्तः एकः ग्रन्थः अलिख्यत। गणेशः तस्य ग्रहलाघवस्य श्लथत्वे सति स एव मार्गदर्शकरूपेण भूत्वा केतकर् महाभागेन ग्रन्थः लेलिखिषिष्यते।

यस्मिन् पक्षे यत्र काले चेन्न दृग्गणितैक्यम्।

दृश्यते तेन पक्षेण कुर्यात् तिथ्यादि साधनम्॥

कालभेदेन यद्गणितं वेधेन दृक्तुल्यत्वं प्राप्नोति तेन पक्षेण तिथ्यादि साधनं कुर्यात् इति। दृग्गणितसिद्धान्तयोर्मध्ये सिद्धान्तः ग्रहणाद्यपेक्षया दृग्गणितमाश्रयति। एवं सङ्क्रान्ति इत्यादि निर्णये दृग्गणिताय सिद्धान्तः अपेक्ष्यते।

दृक्सिद्धग्रहचारेण होराफलमुदीरयेत्।

सिद्धान्तग्रहचारेण श्राद्धादि समयं वदेत्॥

इत्यस्मिन् श्लोके तदाह। अतः प्रत्यक्षकार्यं प्रति (जातकादि विषयादीनां प्रति) दृग्गणितम् तथैव अदृष्टकार्यं प्रति सिद्धान्तग्रन्थोक्तदिशा प्रवृत्तिः करणीयमिति प्राचीनानां मतम्। किमर्थं चेत् सिद्धान्ते तिथीनां

बाणवृद्धि-रसक्षयाः भवन्ति। मध्यमप्रमाणेन तिथेः स्वरूपम् 60 घटिकाः। बाणवृद्धिः चेत् तिथेः परमव्यापकत्वं 65 घटिकाः भवन्ति। रसक्षयाश्चेत् 54 घटिकाः तिथेः लाघवत्वम्।

अतिशीघ्रगतौ चतुःपञ्चाशता घटिकाभिर्भवति।

अतिमन्दगतौ पञ्चषष्ठि घटिकाभिर्भवति॥

इति पुरषार्थचिन्तामणिकारः ग्रन्थे उल्लेखयति।

सायनगणिते रविचन्द्रयोः स्फुटीकरणे व्यर्केन्दुतः राह्वोः इत्यादि संस्काराः रविं प्रति, च्युतितिथिपरिष्कृतः चन्द्रः क्रियते। अत्र उभाभ्यां गतिवैपरीत्येन तिथिषु अष्टवृद्धि-दशक्षयाः भवन्ति न तु प्राचीनवद्रीत्या बाणवृद्धि-दशक्षयाः। अतः केचन वदन्ति दृग्गणितद्वारा धर्मशास्त्रविहितं कार्यं कर्तुं न श्क्यते इति।

यात्राविवाहोत्सवजातकादौ

खेटैस्स्फुटैरेव फलस्फुटत्वम्।

स्यात् प्रोच्यते तेन नभश्चराणां

स्फुटक्रिया दृग्गणितैक्यकृद्या॥

यात्रादयः स्फुटग्रहेणैव संसाध्येरन् । ते च स्फुटग्रहाः दृग्गणितद्वारा सिध्यन्ति। सिद्धान्तकारः ब्रह्मगुप्तस्य उद्देश्यं दृग्गणितयोः ऐक्यस्थापनमेव। सतुतस्यग्रन्थे-

कृत्वाऽपिदृष्टिकर्मश्रीषेणार्यभटविष्णुचन्द्रोक्तम्।

प्रतिदिनमुदयेऽस्तेवानभवतिदृग्गणितयोरैक्यम्॥

भमुनिमृगव्याधानांयतस्ततोदृष्टिकर्मवक्ष्यामि।

दृग्गणितसमंदेयंशिष्यायत्रिरोषितादेयम्॥ इति।

तिथयः अप्रत्यक्षम् इति केचन आक्षिपन्ति। तत् कथम् अप्रत्यक्षम्? तिथिः प्रत्यक्षमेव खलु। आदौ का नाम तिथिः इति जिज्ञासायां शास्त्रे 'सूर्यचन्द्रयोरन्तरमेव तिथिः' इति निरूप्यते। तत्तु सर्वसम्मतमेव। सूर्यचन्द्रौ प्रत्यक्षेण गोचरिणौ स्तः। अतः तयोरन्तरस्तु प्रत्यक्षमेव भवति। तिथिः प्रत्यक्षमेव इति मदीयआशयः। अतः तिथ्यादि विषयेऽपि दृग्गणितमनुवर्तेत। कुतपकाले श्राद्धः आचरेत् इति धर्मशास्त्रकारेण कथितम्। यदि दृग्गणितद्वारा अष्टवृद्धि-दशक्षयाः भवति तर्हि कुतपकाले काचन तिथयः न लभ्यते इति वादः। अतः धर्मशास्त्रस्य विरोधं भवति इति चेन्न।

सायाह्न व्यापिनी या तु पार्वणे सा उदाहृता॥ (गोभिलः)

कुर्वीत कुतपे श्राद्धे सायाह्न व्यापिनी न चेत्॥

इत्यादयः निरासः शास्त्रेष्वपि वर्तन्ते। ''यदा वै सूर्य उदेति। अथ नक्षत्रं नैति। यावति तत्र सूर्योगच्छेत्। यत्र जघन्यं पश्येत्। तावति कुर्वीत यत्कारी स्यात्।'' इत्यादयः वेदवचनानुसृत्य सूर्यचन्द्रयोः दृक्तुल्यत्वं यस्मिन् ग्रन्थे उपपादयन्ति तद् गणितमाश्रित्य कार्याण्यपि आचरेत्। तत्काले दृग्गणितमेव दृक्तुल्यत्वं भजते। अत्र सिद्धान्तग्रन्थाः एवदृग्गणितं प्रति सोपानम्। आद्यैः परिकल्पितानां सोपानं न विस्मर्येत। तद्द्वारा दृग्गणितं अनुसर्तुं शक्यते इत्युक्त्वा लेखनव्यापारात् विरम्यते मया।

।। श्रीकृष्णार्पणमस्तु॥

श्री राधाकृष्णः बि. (शोधच्छात्रः)

राष्ट्रियसंस्कृतविद्यापीठम् तिरुपतिः

ISSN 2456-3420

"ज्योतिषशास्त्रे वर्णितारिष्टयोगाः"

श्री शत्रुघ्नपाण्डेयः

"सूर्य आत्मा जगतस्थुषश्च"[1]

ज्योतिषशास्त्रस्य स्वरूपं केवलं मानवस्य कृते वरदायकं सुखदायकं च सिद्ध्यति। एतस्य स्वरूपं यद्यपि कठिनमस्ति परं पुष्पकोमलं स्निग्धं च वर्तते। इदं जनजीवने नवीनां स्फुर्तिचेतानां च विभ्रत् सर्वत्र सुखं शान्ति प्रसारयति। मनुष्योपरि प्रकृतेः भूयान् प्रभावः समापतति। यस्मिन् स्थाने मानुष्यः जायेत तत्रत्ययं भूतलीयम् आकाशीयं वा वतावरणं सम्मिलितरुपेण तत्र जायमानमजीवनं प्रभावयति।

संसारेऽस्मिन् उत्पन्ना सर्वेऽपिजीवाः जीवितुमिच्छन्ति। सर्वेष्वपि जीवेषु जीजीविषा भवत्येव। कोऽपि जनाः रोगी × दुःखी × दरिद्री × दीनः हीनो वा भवेदनेकाष्वापत्सु वर्तमानोऽपि जीवितुमिच्छन्ति वास्ति। एतेन सिद्ध्यति यन्मरणमेवानिष्टं वर्तते। अरिष्टशब्दो अनिष्टस्यैव वाचकोऽस्ति। अत एव ते योगाः अरिष्टयोगाः भवन्ति ये मृत्युसूचकाः स्युः।

ज्योतिषशास्त्रं रोगातिरिक्तमानवस्य सर्वविधकल्याणार्थं सर्वासां स्थितीनां घटनानां च शुभाशुभनिर्धारणं करोति यथा-

यदुपचितमन्यजन्मनि शुभाशुभं तस्य कर्मणः पक्तिम्।
व्यञ्जयति शास्त्रमेतत् तमसि द्रव्याणि दीप इव।।[2]

अरिष्टयोगः-

फलितशास्त्रस्य मानकग्रन्थेषु उपलब्धानां सर्वेषां अरिष्टयोगानाम् वर्गीकरणं अनेन प्रकारेण कर्तुं शक्यते। समान्यतयारिष्टयोगाः द्विविधा भवन्ति-

1. जातकारिष्टयोगाः।
2. कुटुम्बकाद्यरिष्टयोगाः।

1. जातकारिष्टयोगाः-

जातकारिष्टयोगाः आपि द्विधा भावन्ति-

(क) सद्योरिष्टयोगाः। (ख) बालारिष्टयोगाः।

(क) सद्योरिष्टयोगाः-

अत्र सद्योरिष्टयोगस्य प्रभावेण जन्मकालात् एकवर्षाभ्यान्तरे बालारिष्टयोगाः भवन्ति-

एकत्र मन्दावनिनन्दनार्का रन्ध्रस्थिता वा रिपुराशियाताः।
सौम्यैरयुक्ता अविलोकितास्ते जातस्य सद्यो मरणप्रदाः स्युः।[3]

शनि भौमः सूर्यः अष्टमे षष्ठे स्थाने वा शुभ ग्रहः रहितः स्वं शुभग्रहः अदृष्टः स्यात् तर्हि जतकः शीघ्रमेव म्रियते।

क्षीणेन्दौ द्वादशगे लग्नाष्टमराशिसंस्थितैः पापैः।
सौम्यरहिते च केन्द्रे सद्यो मृत्युर्विनिर्देश्यः।।[4]

द्वादश भावे यदि क्षीण चन्द्रमा स्यात् लग्ने अष्टमे च पाप ग्रहः स्युः केन्द्रे शुभ ग्रहाः नैव स्यात् तर्हि जातकस्य शीघ्रं मृत्युः ज्ञातव्यम्।

यद्द्रेष्काणे च यामित्रे यस्य स्याद्दारुणो ग्रहः।
क्षीणचन्द्रो विलग्नस्थोसद्यो हरति जीवितम्।।[5]

यस्य लग्नस्य देष्काणे सप्तमे भावे च पाप ग्रहाः भवेयुः तथा च क्षीण चन्द्रः लग्ने स्यात् तदा जातकस्य शीघ्रमेव निष्प्राण्ये भवति।

(ख) बालरिष्टयोगाः-

वर्षद्वयाद् द्वादश वर्षाभ्यान्तरे जातकस्य मरणं सञ्जायते-

चतुर्विंशतिवर्षाणि यावतगच्छन्ति जन्मतः।
जन्मारिष्टं तु तावत्स्यादायुर्दायं न चिन्तयेत्।।
षष्ठाष्टरिष्फगश्चन्द्रः क्रूरैश्च सहवीक्षितः।
जातस्य मृत्युदः सद्यस्त्वष्टवर्षैः शुभेक्षितः।।[6]

जन्मतः चतुर्विंशति वर्षं यावत् बालारिष्टः भवति। अतः उक्तवर्ष यावत् बालकनां आयुर्गणना नैव कर्तव्या। जन्म लग्नात् षष्ठे अष्टमे द्वादशे भावे वा चंद्रमा भवेत् एवं क्रूर ग्रहाणां दृष्टिर्भवेत् तर्हि बालकस्य शीघ्रमेव मृत्युर्भवति यदि शुभ ग्रह दृष्टि भवेत् अष्टमे वर्षे अरिष्टः ज्ञातव्यम्।

षष्ठेष्टमेऽपि चन्द्रः सद्यो मरणाय पाप संदृष्टः।
अष्टाभिः शुभदृष्टे वर्षैर्मिश्रैस्तदर्धेन।।[7]

यस्य जन्म लग्नात् षष्ठमे अष्टमे स्थाने वा चन्द्रमा भवति एवं केवलं पापग्रहेण दृष्टः भवति तर्हि जातकस्य मृत्युर्भवति। यदि केवलं शुभ दृष्टिः भवेत् तर्हि अष्टवर्षपर्यन्तं तथा पाप शुभद्वयोः दृष्टे सति जातकस्य आयुः चतुर्वर्षं भवति।

रविचन्द्रभौमगुरुभिः कुजगुरुसौरेन्दुभिः सहैकस्थैः।
रविशनिभौमशशाङ्कैर्मरणं खलु पञ्चभिर्वर्षैः।।[8]

रविचन्द्रभौमगुरूणां एकत्र योगे अथ च भौम गुरु शनि चन्द्रणां योगे, तथा च रवि शनि भौम चन्द्रणां योगे सति निश्चयेन जातकस्य पञ्चमे वर्षे मृत्युर्भवति।

2. कुटुम्बकाद्यारिष्टयोगाः–

कुटुम्बकाद्यारिष्टयोगाः जातकस्य परिवारिकजनानां कष्टस्य निधनस्य वा सूचकाः भवन्ति।

कुटुम्बकाद्यारिष्टयोगाः मुख्यतया निम्नाः सन्ति–

(क) पित्रारिष्टयोगाः। (ख) मात्रारिष्टयोगाः।

(ग) भ्रात्रारिष्टयोगाः। (घ) मतुलादिरिष्टयोगाः।

(क) पित्रारिष्टयोगाः–

व्ययस्थितेऽर्के ससुते विलग्नादपि क्षयेन्दौ मदनोपयाते।
पितुर्वियोगं प्रवदन्ति सद्यः शुभेक्षिते तु त्रिभिरब्दमानैः।।[9]

लग्नात् द्वादशे स्थाने सूर्य एवं शनि स्यातां क्षीण चन्द्रमा सप्तमे स्यात् तर्हि पितुः शीघ्रमेव वियोगः भवति एवञ्च शुभ ग्रहं दृष्टिर्भवेत् तर्हि वर्ष त्रये पितुः मृत्युः भवति।

रिपुस्थाने यादा चन्द्रो लग्नस्थाने शनैश्चरः।
कुजश्च सप्तमस्थाने पिता तस्य न जीवति।।[10]

यदि षष्ठस्थाने चन्द्रमा लग्ने शनि सप्तमे च भौमः पश्यति चेत् तस्य जातकस्य पितृ मृत्युं गच्छति।

(ख) मात्रारिष्टयोगाः–

चंद्रमा यदि पापानां त्रितयेन परदृश्यते।
मातृनाशो भवेत्तस्य शुभदृष्टे शुभं भवेत्।।[11]

यदि जन्म समये चन्द्र ग्रहं त्रयः पाप ग्रहाः पश्यन्ति तदा मातुः मृत्युः तथा च शुभ ग्रहाः पश्यन्ति चेत् शुभं भवति।

चन्द्राच्चतुर्थोपगतैरसद्भिर्वानस्थितैः शोभनदृष्टिमुक्तैः।
व्यापारगैर्वा यदि वासरेशज्जातस्य माता निधनं प्रयाति।।[12]

चन्द्राच्चतुर्थगतैर्वा दशमे भावे पाप ग्रहौ भवतां एवं शुभ ग्रह दृष्टि रहितः स्यातां तर्हि जातकस्य मातुः निधनं भवति।

(ग) भ्रात्रारिष्टयोगाः–

यस्य जन्मनिधीस्थाः स्युः सूर्यार्केन्दुकुजाभिधाः।
तस्य त्वाशु जनित्री च भ्राता च निधनं लभेत्।।[13]

यस्य जन्मांके पञ्चमे स्थाने सूर्यङ्कशनिङ्कचंद्रङ्कभौमादयः ग्रहाः भवन्ति तस्य जातकस्य माता च भ्राता च मृत्युं गच्छतः।

यादा क्रूरखगो विलग्नाद्रातिगः सोदरनाशहेतुः।[14]

यदि लग्नात् षष्ठमे भावे क्रूर ग्रहाः स्युः तर्हि सोदर नाशं भवति।

(घ) मातुलादिनारिष्टयोगाः–

ताताम्बिकासोदरमातुलाश्च मातामही मातृपिता च बालः।
सूर्यादिकैः पञ्चमधर्मयातैः क्रूरर्क्षगतैराशु हताः क्रमेण।।[15]

लग्नात् पञ्चमो वा नवमः भावः पापदृष्टिर्भिवेत् तत्र सूर्यादिग्रहे प्राप्ते तदानीं शीघ्रमेव नाशं भवति तथा सूर्ये पितुः चन्द्रे मातुः भौमे सोदरस्य बुधे मातुलस्य गुरौ मातामह्याः शुक्रे मातामहः शनैश्चरे जातकस्येव मृत्युर्भवति।

ज्योतिषशास्त्रम् प्रतिक्षणं लोकोपकारं करोति रुग्णजनानां ग्रहचिकित्समाध्यमेन उपचारः अरिष्टग्रस्तानाम् अरिष्टशमनोपायः विविध अशुभयोगस्य निवारणं होराशास्त्रमाध्यमेन क्रियते।

पादटिप्पणी

1. शुक्लयजुर्वेदः।
2. लघुजातकं राशिप्रभेदाध्यायः श्लोकः 3।
3. जातकपारिजातः अध्यायः 4 श्लोकः 22
4. लघुजातकं अरिष्टाध्यायः श्लोकः 6।
5. वृ. पा. हो. शा. अरिष्टाध्यायः श्लोकः 21
6. वृ. पा. हो. शा. अरिष्टाध्यायः श्लोकः 1, 2
7. लघुजातकम् अरष्टिाध्यायः श्लोकः 1
8. जातकपारिजातः अरिष्टाध्यायः श्लको: 43।
9. जातकपारिजातः अध्यायः 4 श्लोकः 18।
10. वृ पा. हो. शा. अरिष्टाध्यायः श्लोकः 38
11. वृ पा. हो. शा. अरिष्टाध्यायः श्लोकः 23
12. जातकपारिजातः अध्यायः 4 श्लोकः 13।
13. वृ. पा. हो. शा. अरिष्टाध्यायः श्लोकः 23।
14. जातकपारिजातः अध्यायः 4 श्लोक 13।
15. जातकपारिजातः अध्यायः 4 श्लोक 6।

सन्दर्भग्रन्थसूची

1. शुक्लयजुर्वेदः
2. अमरकोशः अमरसिंह हरगोविंदसिंह चौखम्भा वाराणसी सं 2004।
3. जातकपारिजातः वैद्यनाथः चौखम्भा संस्कृत संस्थान वाराणसी सं 2002।
4. वृहजजातकं वाराहमिहिरः मोतीलाल वानारसीदास वाराणसी सं 2007।
5. वृ. पा. हो. शा. महर्शिपराशरः चौ.सुरभारती सं 2009।

श्री शत्रुघ्नपाण्डेयः, शोधच्छात्रः

राष्ट्रियसंस्कृतसंस्थानम् लखनऊ परिसरः

ISSN 2456-3420

जातेरस्त्रीविषयादयोपधात् इति सूत्रस्य जातिपदविमर्शः

सुश्री राधाशर्मा

जनि प्रादुर्भावे इत्यस्मात् धातोः ''स्त्रियाम् क्तिन्'' इति सूत्रेण क्तिन् प्रत्यये कृते सति जातिशब्दः निष्पद्यते। यस्यार्थः भवति जन्मना यत्प्राप्यते सा जातिः। लोकेऽपि तावत् जातिपदेन गोत्रम्, वंशः, कुलम्, इत्याकारिका जातिः स्वीक्रियते। शब्दकल्पद्रुमनामककोशेऽपि जातिपदेन ''गोत्रम्'' इति स्वीकृतम् ''यथा-जायते अस्यामिति जातिः।''जनि'' इत्यस्मात् धातोः अधिकरणार्थे क्तिन् प्रत्यये कृते जातिः पदं निष्पद्यते इति तत्रोक्तम्। संस्कृतवाङ्मये प्रायशः जातिपदेन वर्णव्यवस्था स्वीकृता वर्तते। कोशेषु अन्यतमे अमराख्यकोशे जातिपदेन इदं भणितम्-

अतिमुक्तः पुण्ड्रकः स्याद्वासन्ती माधवी लता।
सुमना मालती जातिः सप्तला नवमालिका।।[1]

तथा

जातिर्जातं च सामान्यं व्यक्तिस्तु पृथगात्मता।
चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः।।[2]

का नाम जातिः? इति प्रश्ने नैयायिकाः तावत् ''नित्यमेकमनेकानुगतं सामान्यम्'' इति जातिलक्षणं स्वीकुर्वन्ति। यथा ''घटत्वम्''। घटपदार्थे विद्यमाना घटत्वजातिः एका नित्या च, अपि च एकस्मिन् समये सर्वेषु घटपदार्थेषु समवायरूपेण युक्ताऽस्ति अनुगता चास्ति। अतः 'घटत्वम्' जातिः।

मीमांसकाः जातिशक्तिवादिनः। ते जातौ शक्तिं स्वीकुर्वन्ति। यत्तु जातौ शक्तिस्वीकारे 'घटमानय' इत्यस्मिन् वाक्ये न कदापि घटत्वस्यानयनमपितु घटरूपव्यक्तेः आनयनम् अतः कथं तत्र बोधश्चेत् इति तन्न-व्यक्तिबोधः आक्षेपेण इति मीमांसकाः समादधन्ति।

वैयाकरणानां मतम्-

वैयाकरणाः कथयन्ति यदि 'नित्यमेकमनेकानुगतं सामान्यम्'' इति तार्किकोक्ता जातिः स्वीक्रियते तर्हि शुक्लादिगुणस्य नित्यत्वैकत्वपक्षे शुक्लेत्यादावतिव्याप्तिः, 'औपगवी कठी' इत्यादवव्याप्तिः च। अपि च जननेन यत् प्राप्यते ब्राह्मणत्वादि सा जातिः चेत् युवत्वादौ अव्याप्तिः, युवत्वस्य जन्यत्वाभावात्। अपि च 'युवतितरा' इत्यत्र युवतिशब्दस्य जात्यभावात् 'जातेश्च' इति सूत्रेण विधीयमानः पुंवद्भावनिषेधो न स्यात् अर्थात् पुंवत्वं तत्र भविष्यति, तेन च युवतितरा इति रूपं न स्यात्।

अतः नैयायिकमीमांसकवेदान्तिकानाञ्च जातिः व्याकरणशास्त्रे नाङ्गीक्रियते। ''जातेरस्त्रीविषयादयोपधात्'' इत्यस्मिन् सूत्रे जातिपदं पारिभाषिकपरम्। त्रीभिः प्रकारैः जातेः लक्षणं कृतं वर्तते। यथोक्तं भाष्यकारैः-

आकृतिग्रहणा जातिः लिङ्गानां च न सर्वभाक्।
सकृदाख्यातनिर्ग्राह्या गोत्रं च चरणैः सह।।

अपरञ्च-

प्रादुर्भावविनाशाभ्यां सत्त्वस्य युगपद् गुणैः।
असर्वलिङ्गां बह्वर्थां तां जातिं कवयो विदुः।।

प्रथमस्यायमर्थः = ''आकृतिग्रहणा जातिः''।

आकृतिः = अवयवसन्निवेशः। गृह्यतेऽनेनेति ग्रहणम् = व्यञ्जकम् करणसामान्ये ल्युट्प्रत्ययेन इदं पदं संस्क्रियते। ननु करणसाधनग्रहण-शब्दस्याकृतिसमानाधिकरणतया स्त्रीत्वेन 'आकृतिग्रहणीका' इति स्यात्? इति चेत् न। 'सामान्ये नपुंसकम्' इत्यनेन ग्रहणशब्दस्य नपुंसकत्वात्। अतः आकृतिः ग्रहणं यस्याः सा आकृतिग्रहणा जातिः। ननु आकृतिरपि जातिरेवेति जातिव्यङ्ग्या जातिरिति, उक्तम्-अवयवसंन्निवेश-विशेषव्यङ्ग्या जातिः इत्यर्थः। गोत्वादिजातेः लक्षणमेतत्। ईदृशाकारो गौः इत्याकृत्युपदेशादिव्यङ्ग्या इत्यर्थः। सिद्धान्तकौमुद्यामस्योदाहरणं 'तटी' इति दत्तम्। जलसमीपप्रदेशः आकृतिविशेषविशिष्टस्तटः, अतः तटत्वमाकृतिव्यङ्ग्यत्वाज्जातिः। अतः तटशब्दस्य जातिवाचित्वात् अनियतस्त्रीलिङ्गत्वादयोपधत्वाच्च ङीष् प्रत्ययः।

ननु यदि आकृतिव्यङ्ग्या जातिश्चेत् तर्हि बाल्याद्यवस्था-भेदभिन्नानेकदेहवृत्तिदेवदत्तत्वादेः आकृतिव्यङ्ग्यत्वेन तत्राऽतिव्याप्तिः इति चेत् न-

तदोच्यते-''आकृतिव्यङ्ग्या जातिः'' इति लक्षणेन यदि देवदत्तत्वादौ अतिव्याप्तिः तर्हि अस्मिन् लक्षणे समानकालिकानेक-व्यक्तिवृत्त्यनुगतसंस्थानत्यङ्ग्या जातिः इति विशेषणदलं योजनीयम्। तेन देवदत्तादिषु समानकालिकानेकव्यक्तिवृत्याभवात् नातिव्याप्तिः। वस्तुतस्तु विशेषणदलं विनाप्यत्र दोषः वार्यते, कथमिति चेत्-देवदत्ते अवस्थाभेदेऽपि चैत्ररूपीधर्मिणः भेदाऽप्रतीतेः स एवाऽयमिति प्रतीतेश्च।

एवम्प्रकारेण एतेन जाते: प्रथमलक्षणेन गोत्वादिजातिर्लक्षिता।

ननु वृषले ब्राह्मणादिव्यावृत्तसंस्थानाऽभावादव्याप्ति:, अर्थात् जाते: प्रथमलक्षणेन गोत्वादिजातिस्तु संगृहीता, ब्रह्मणक्षत्रियादीनां संस्थानस्य सदृशत्वात्। अत: तत् संग्रहाय लक्षणान्तरमाह-

''लिङ्गानां च न सर्वभाक् सकृदाख्यातनिर्ग्राह्या''

इयमपि जातिरित्यर्थ:। लिङ्गानाम् इति कर्मणि षष्ठी, लिङ्गानि सर्वाणि भजतीति सर्वशब्दस्य लिङ्गापेक्षत्वे असमर्थत्वात् ''भजो ण्वि:'' इति ण्विप्रत्यय: न, तथापि भाष्यप्रामाण्यात् अत्र ''भजो ण्वि:'' इत्यनेन ण्विप्रत्यय: समासश्च भवति। आख्यातम् = आख्यानम्, उपदेश इत्यर्थ:। आख्यातेति भावे क्त प्रत्यय:।

निर्ग्राह्या = व्यक्त्यन्तरे उपदेशं विनापि सुगमेत्यर्थ:। अत: ''असर्वलिङ्गत्वे सत्येकस्यां व्यक्तौ कथनाद् व्यक्त्यन्तरे कथनं विनापि सुग्रहा जाति:'' इति जाते: लक्षणान्तरम्। यथा-'वृषली'। वृषलत्वं हि असर्वलिङ्गं नपुंसकत्वाऽभावात्, एकस्यां व्यक्तौ वृषलत्वे उपदिष्टे सति तदपत्यसहोदरादिषु तदुपदेशं विना तस्य सुग्रहत्वात्।

ननु तटादिशब्दानां सर्वलिङ्गत्वेन जातित्वानुपपत्ति:, तटशब्दस्या-सर्वलिङ्गत्वाऽभावात्। इति चेत्-उच्यते यत् लिङ्गानाञ्च न सर्वभागित्य-नेन सर्वलिङ्गवतां जातित्वं निषिध्यत इति न, तत्पूर्वलक्षणेन स्यात्। अप्राप्तप्रापणार्थं चेदं वचनम् अर्थात् पूर्वेण यत्राप्राप्तं जातित्वं तदर्थमिदम्। पूर्वलक्षणेन अप्राप्तस्य विधानमेवानेन क्रियते, न तु निषिध्यत इत्यर्थ:। अत: तटादे: सर्वलिङ्गत्वेऽपि आकृतिग्रहणत्वाज्जातिरूपोपपत्ति:।

नन्वेवमपि देवदत्तत्वादे: असर्वलिङ्गत्वात् जातित्वापत्ति:? अत आह-उपदेशसहायप्रत्यक्षेण एकत्र गृहीतब्राह्मणत्वस्य तद्भ्रातृपित्रादिरु-पपिण्डान्तरे ग्रहणवत् न देवदत्तत्वं क्वचित्पिण्डान्तरे प्रतीयते। यद्यपि पिण्डान्तरस्यापि 'देवदत्त' इति संज्ञा, तथापि वाचकसादृश्यमेव, न तु अर्थसादृश्यं तत्र प्रतीयते। लिङ्गानां च न सर्वभाक्'' इत्यनेन शुक्ला-दिव्यावृत्ति:। अत: देवदत्तेत्यसर्वलिङ्गत्वेऽपि जातिलक्षणङीषभाव:। अनेन द्वितीयलक्षणेन जनननिमित्तकब्राह्मणत्वादिजातिसङ्ग्रह:।

नन्वेवमपि 'औपगवी' कठीत्याद्यसंङ्ग्रह:, औपगवत्वादे: अनुगतसंस्थानव्यङ्ग्यत्वाभावात्, सर्वलिङ्गत्वाच्च अत उक्तम् लक्षणान्तरम्-''गोत्रं च चरणै: सह''। अत्र लक्षणे गोत्रपदेन सामान्यं लौकिकं वा अपत्यं विवक्षितं वर्तते, न तु ''अपत्यं पौत्रप्रभृतिगोत्रम्'' इति सूत्रोक्तपारिभाषिकम् अपत्यम्। अत एव तत्त्वबोधिनीटीकायाम् अपत्याधिकारादन्यत्र लौकिकं गोत्रं गृह्यते इति उक्तं वर्तते। अत्र प्रमाणमस्ति 'अनुपसर्जनात्' इति सूत्रस्थभाष्यम्। तत्र हि ''अवन्तेरपत्यं स्त्री'' इत्यत्र ''वृद्धेत्कोसलाजादाञ्ञ्यङ्'' इत्यनेन ञ्यङ्प्रत्यय: तस्य ''स्त्रियामवन्तिकुन्तिकुरुभ्यश्च'' इत्यनेन लुकि। अत्र प्रत्ययार्थं प्रति प्रकृत्यर्थस्योपसर्जनत्वात् 'इतो मनुष्यजाते:' इत्यस्य इकारान्तादयोप-धान्मनुष्यजातिवाचिनोऽनुपसर्जनात् प्रातिपदिकादित्यर्थकरणे अवन्तीप्रातिपदिकार्थस्यात्र उपसर्जनत्वेन 'इतो मनुष्यजाते:' इति ङीष् न प्राप्नोति, इति पूर्वपक्ष:।

तदोक्तम्-

''सिद्धं तु जातेरनुपसर्जनत्वात्''

अर्थात् न जातिरुपसर्जनम्। प्रत्यये लुप्ते प्रकृतिरेवापत्यंलक्षणां जातिमाह, सा चानुपसर्जनम् इत्यर्थ:। अवन्तिशब्दस्य अपत्यप्रत्यया-न्तत्वात् 'गोत्रं च चरणै: सह' इत्यनेन जातित्वम्। अत्र 'अवन्तेरपत्यं स्त्री' इत्यत्र अनन्तराऽपत्येऽपि गोत्रत्वारोपेणात्र जातित्वम् इति भाव:। अनेन अवन्तीत्यत्र जातिप्रयुक्तो ङीष् इत्यर्थ:। अनेन 'अनुपसर्जनात्' इति सूत्रस्थभाष्येण ''गोत्रशब्देन अपत्यं विवक्षितं, न तु पारिभाषिकम्'' इति सङ्गच्छते। शब्देन्दुशेखरे तु पारिभाषिकमेव गोत्रमिह विवक्षितमिति प्रपञ्चितम्। चरणशब्दस्तु अत्र शाखाध्येतरि प्रसिद्ध:। गोत्रं चरणाश्च जातिरिति लभ्यते। गोत्रमुदाहरति औपगवी इति चरणमुदाहरति कठी इति।

सन्दर्भग्रन्थसूची

1. वैयाकरणसिद्धान्तकौमुदी, चौखम्बा सुरभारती प्रकाशन, 2015
2. व्याकरणमहाभाष्यम्, चौखम्बा सुरभारती प्रकाशन, 1991
3. वैयाकरणसिद्धान्तकौमुदी, भारतीय विद्या प्रकाशन वाराणसी, 2005
4. लघुशब्देन्दूशेखर, चौखम्बा संस्कृत भवन, 2015।

सुश्री राधा शर्मा, शोधच्छात्रा व्याकरणविभाग:

राष्ट्रियसंस्कृतसंस्थानम्, वेदव्यासपरिसर:, बलाहर: (हि. प्र.)

ISSN 2456-3420

ग्रहजनितरोगाणां समीक्षणं निदानञ्च

श्री राकेशकुमारः

ज्योतिषशास्त्रे ग्रह नक्षत्र ताराधूमकेतवादीनां कालादीनां मूहुर्तादीनां निरूपणं भवति। ज्योतिष शब्दस्य व्युत्पत्तिः द्युत धातोः ''इसुन'' प्रत्यये अनुबन्ध लोपे च कृते भवति।

सामान्यतः ज्योतिषम् सिद्धान्तासंहिताहोराभेदेन स्कन्धत्रयात्मकं वर्तते। अनेन त्रिस्कन्धज्योतिषनाम्नाभिज्ञायते। केचन् विद्वासः ज्योतिषशास्त्रं सिद्धान्तसंहिताहोराप्रश्नशकुनात्मकमिति पञ्चस्कन्धात्मकं कथयन्ति।

वेदाङ्गस्य षड्ङ्गेषु तावज्ज्योतिषशास्त्रमेव दिग्देशकालव्यञ्जकत्वेन न केवलं, यज्ञतपोदानव्रतोपासनादिबीजमपितु मानवानां कृते इष्टप्राप्तौ अनिष्ट परिहारे च सहायकमस्ति।

ज्योतिषशास्त्रे मुख्यतया नव ग्रहाः सन्ति। सर्वेपि ग्रहाः स्वकीयं अवस्थानुसारेण स्थित्यनुसारेण विभिन्नप्रकाराणां शुभाशुभ फलानि प्रयच्छन्ति।

केचन् योगाः मानवानां कृते शुभकराः एवञ्च केचन् अशुभकराः भवन्ति। पाञ्चभौतिकशरीरेऽस्मिन् व्याधिमन्दिरे वात-पित्त-कफेति प्रकृतित्रयः मानसिकशारीरीक रोगाणां मूलकारणं वर्तन्ते।

भारतीय वैद्यशास्त्रानुसारेण मानवस्य शरीरे शरीरतत्वानां प्राणतत्वानां च असंतुलितावस्था एव रोगः। भारतीय दर्शनानुसारेण दुखभोगायैव प्राणिनो जन्म जायते। अनेन प्रतीयते यत् जन्मः दुखस्यमूलमिति।

वस्तुतः पूर्वजन्मोपार्जितं शुभाशुभं इह व्याधिरुपेण फलितम् भवति।

यथोक्तम्-

जन्मान्तरकृतं पापं व्याधिरुपेण जायते।

तच्छान्तिरोषधैर्दानैर्जपहोमार्चनादिभिः।।[1]

सूर्यादि ग्रहेभ्यः विभिन्नप्रकाराणां रोगाणां उत्पत्तिर्भवति। सूर्यादि ग्रहाणां बलसापेक्षत्वेन अशुभत्वस्य प्रमाणेन रोगस्य स्वरुपं प्रभावं कष्टं तीव्रत्वं च प्रतीयते।

पीडादुखादीनां ज्योतिषोक्तं विधानैः मन्त्रतन्त्र-औषध्यादिभिः विभिन्नदुष्टघटनां चक्राणां रोगशोकानां शमनस्य मार्गं दर्शयतीति।

सर्व दुःखमयेऽस्मिन् संसारे सर्वेऽपि मानवाः नानाविधरोग-व्याधिभिः पीडिताः दरीदृश्यन्ते। तत्र अद्यतनकाले ग्रहजनितरोगाणां समूहे शारीरिक रोगाः मानसिक रोगाः च दृश्यन्ते।

रोगाणां समस्याः वातावरणभेदेन, आहारभेदेन, चिन्ताप्रकृत्यादि भेदेन च विभिन्नतां प्राप्रनुवन्ति। रोगकारणानि कानि इति विषये प्रश्नमार्गे वर्णनं प्राप्यते यत् रोगार्तिनः कृते रोगानां बहूनि कारणानि भवन्ति। परञ्च तेषां मूलत्वेन त्रीणि कारणानि तिष्ठन्ति तत्र प्रथमः भूतवशाद्, ग्रहगतिवशाद् वातपित्तादिकोपाच्च।

रोगार्तानामिह तु बहुधा कल्प्यते रोगहेतुः

भूतावेशाद्ग्रहगतिवशाद्वातपित्तादिकोपात्।

एततथ्यं त्रिविधमुदितं प्रायशः स्वीयपाप्मा

रोगात्पत्तेर्भवति हि नृणां हेतुरेकस्त्रिधा स्यात्।।[2]

प्रसवकाले सदसद् ग्रहजनितप्रभावः विशेषात् अंगविशेषे पुष्टिः उपद्रव ग्रस्तता च द्रष्टुं शक्यते। तत्पश्चात् बाल्यावस्थायां बालः पूर्वजन्मोपार्जितशुभाशुभकर्माणां फलं प्राप्रोति।

आद्वाद्वादशाब्दान्तरयोनिजन्मनामायुष्कला निश्चयितुं न शक्यते।

मात्रा च पित्रा कृतपापकर्मणा बालग्रहैर्नाशमुपैति बालकः।।[3]

आत्मादीनाम् दैर्बल्यात् अनेकविधव्याधीनामुत्पत्तिः मानवस्य शरीरे जायते। मानवशरीरेविविधरोगैः सह सूर्यादिनवग्रहाणां सम्बन्धः प्रतीयते। यतोहि दोषत्रयमधिकृत्य बहवो रोगाः उपजायन्ते। रोगस्य कारणानि ज्योतिषे स्पष्टतया प्रोक्तानि विद्यन्ते।

रोगसम्बधिनः भावाः

रोगविचारप्रसङ्गे जातकस्य रोगभावगतैः ग्रहैः अथवा षष्ठाष्टमद्वादश भावस्थैः ग्रहैः रोगाणां विचारः क्रियते। मुख्यतया रोगाणां विचारः षष्ठमभावतः क्रियते। षष्ठम भावः शत्रुभावः इति अपि कथ्यते भावेस्मिन् विभिन्नाः स्थितयः भवन्ति याभ्यः विभिन्नानां रोगाणां विचारः क्रियते यथा-

षष्ठे भावे पापग्रहः भवेत्, षष्ठेशः पापग्रहेण, राहुशनिभ्यां च युक्तः भवेत् तदा जातकः सदैवरुग्णतां प्राप्नोति।

वातरोगः-षष्ठे भावे चन्द्रः पाप ग्रहेण युक्तः दृष्टः वा स्यात् तदा वातरोगः सम्भूयते।

व्रणरोगः-षष्ठेशः सूर्येण युक्तः प्रथमे अष्टमे वा भावे स्यात् तदा शिरसि व्रणरोगः जायते षष्ठेशः भौमेन युक्तः प्रथमाष्टमे वा स्याद् तदा कण्ठे अनेनैव क्रमेण बुधेन हृदये, जीवेन नाभौ, शुक्रेण नेत्रे, शनैश्चरेण पद्भ्याम् व्रणरोगो जायते।

क्षयरोगः-षष्ठे भावे लग्नेशशुक्रयोः युतिः एवञ्च पापग्रहस्य दृष्टिः भवेत् तदा जातकः क्षयरोगेन पीड़ितः भवति।

उदररोगः-षष्ठेशः निर्बलः भौमः च लग्ने स्यात् तदा जातकः उदरगुल्मरोगेन पीड़ितः भवति।

यथोक्तं-

अजीर्णगुल्मामयशूलमेति कुजे विलग्ने विबलेरिनाथे।
लग्नेसपापे फणिनायके वा मन्देष्टमे कुक्षिरुगर्दितः स्यात्।।[4]।

ग्रहजनितरोगाणां रोगज्ञाने यस्याङ्गस्य दौर्बल्यं येन ग्रहेण जातं तत् ग्रहसम्बन्धिस्थानधातु प्रवृत्याद्यनुगुणं तस्मिनङ्गे रोगस्य उत्पत्तिः भवति।

सूर्यादिग्रहैः विचार्यमानाः रोगाः-

सूर्यजनितरोगाः-सूर्येण पित्तप्रधानरोगाः, अतिसारः, ज्वरः, मस्तिष्कस्योपरि सम्भाव्यमानरोगः, हृदयविकारः, नेत्रविकारः, रक्तपित्तः विकारः, अस्थिविकारः, नेत्रबिन्दुः, मूर्छा विचारः च क्रियते।

चन्द्रजनितरोगाः-चन्द्रमसा कफप्रधान रोगाः, बालानां रोगाः, जलोदर रोगाः, गर्भिणी स्त्रियाः रोगाः, श्वासरोगाः, शीतज्वरः, पाण्डुरोगः, जलदोषः, कामलारोगः, पिनसरोगः, गर्भकोशविकारः, नासिकारोगः, उदरविकारः, इत्यादयः।

कुजेनविचार्यमाणाः रोगाः-पित्तप्रधानरोगाः, ज्वरः, रक्तचापम्, रक्तपित्तविकारः, स्नायुविकारः, व्रणरोगः, भगन्धरः, आन्त्रिकव्रणश्चेति सम्बन्धिनः रोगाः जायन्ते।

बुधेन सूच्यमाणाः रोगः-मनोविकारः, गुह्यरोगः, उदररोगः, वायुरोगः, शूलरोगः, अदृश्यरोगः, चर्मरोगः, कुष्ठ रोगः, उन्मादः वाचि अस्पष्टता मूकत्वञ्चेति।

गुरुणा विचार्यमाणाः रोगाः-यकृतविकारः, गुल्मरोगः, प्लीहमधुमेहः, जलोदरः, नासिका नेत्रादि अंगेषु रोगाः।

शुक्रेण संसूच्यमाणाः रोगाः-आर्तवविकारः, योनिदोषः, वीर्यविकृतिः, प्रमेहरोगाः, मूत्रविकारः, प्रजननेंद्रियविकारः, स्त्रीषु प्रदरः तथा गर्भाशय शूलादि रोगाः संसूच्यन्ते।

शनिना संसूचितरोगाः-सन्धिवातः, वातरक्तः, पक्षाघातः, धनुर्वातः, जंघापृष्ठमूलं स्थाविरावस्थायां सम्भाव्यमानः रोगः, जीर्ण ज्वरः, सर्वाङ्गे वायुजन्य रोगाः प्रभवन्ति।

राहुणा विचार्यमाणाः रोगाः-मनोविकारः, मूर्छा, अपस्मारः, विषजन्यरोगाः, संक्रामकः नेत्रकृमि जनितरोगाः, भूतप्रेत्तादि व्याध्यः प्रभवन्ति।

केतुना विचार्यमाणाः रोगाः-सन्धिरोगः, कण्डूरोगः, मसूरिरोगादीनां विचारः क्रियते।

ज्योतिषे ग्रहजनितरोगानां निदानम्-प्राचीनकालादेव ज्योतिषशास्त्रं चिकित्साशास्त्रमन्योन्याश्रय सम्बन्धेन एकमन्यस्यपूरकमस्ति। ज्योतिषायुर्वेदशाश्त्रयोः रोगाणां कारणज्ञानेनिवारणे च पौर्वापर्यसम्बन्धो वर्तते। तत्र ग्रहजनितरोगाणां ज्योतिषशास्त्रकथित तन्त्रमन्त्रयन्त्रमाध्यमेन ज्योतिषीयोपचारः रोगनिवारणे प्रसिद्धमस्ति। रोगस्योपचाराय बहवः प्रद्धतयः सन्ति। परञ्च आधुनिकसमयेऽपि यत्र चिकित्साशास्त्रं कस्यचिद् रोगस्यचिकित्सां कर्तुं असमर्थः दृश्यते तत्र ज्योतिषे उपचारः समर्थः दृश्यते।

निष्कर्षः-सूर्यादिनवग्रहाः जातकस्योपरि प्रभावं कुर्वन्ति कान् रोगान् चोत्पादयन्ति दुःखान् च जनयन्ति, तेषां पूर्वमेव रोगारम्भसमये यथोचितोपचारेण रोगाणां समीक्षणं कृत्वा निवारणं भूयात्।

एवञ्च ध्येयवाक्यं ज्योतिषे सार्थकतां प्राप्नुयात्-

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पश्यन्तु मा कश्चिद्दुःखभाग्भवेत्।।

पादटिप्पणी

1. प्रश्न मार्ग 13 अध्याय श्लोक 19।
2. प्रश्नमार्ग अ. 12 श्लोक 31
3. जातक पारिजात अरिष्टाध्याय श्लोक 1।
4. जातकपारिजात जातभङ्गाध्याय श्लोक 90।

श्री राकेशकुमारः, शोधच्छात्रः (ज्योतिषविभागः)
राष्ट्रियसंस्कृतसंस्थानम्, वेदव्यासपरिसरः, बलाहरः (हि. प्र.)

ISSN 2456-3420

ज्योतिषशास्त्रे दिग्देशकालविमर्शः

श्री अमित शर्मा

यथा शिखा मयूराणां नागानां मणयो यथा।

तद्वद्वेदाङ्गशास्त्राणां ज्योतिषं मूर्धनि संस्थितम्।।[1]

भारतीय संस्कृतेः साधनायाश्च मूलः वेदः वर्तते। भारतीयवाङ्मये सर्वाधिकप्राचीनम् एवं प्रामाणिकं च साहित्यं वेदः। वेदेषु सृष्ट्यारम्भतः कालविभाजनपर्यन्तं प्राप्यते। वेदानां सम्यक् परिज्ञानाय षडङ्गाः शिक्षा-कल्प-व्याकरण-निरूक्त-छन्द-ज्योतिषसंज्ञकाः प्रकलिप्ताः सन्ति। तानि हि वेदानां सम्यगवबोधनार्थं प्रवृत्तानि। वेदाङ्गानां ज्ञानं विना वेदार्थः प्रतिपत्तुं नैव शक्यते।

अन्यच्च-

वेदा हि यज्ञार्थमभिप्रवृत्ताः कालानुपूर्वा विहिताश्च यज्ञाः।

तस्मादिदं कालविधानशास्त्रं यो ज्योतिषं वेद स वेद यज्ञान्।।[2]

शब्दकल्पद्रुमे परिभाषा-ज्योतिः सूर्यादीनां ग्रहाणां गत्यादिकं प्रतिपाद्यतया अस्त्यस्येति अच्। वेदाङ्गशास्त्रविशेषः।[3]

ज्योतिषां ग्रहनक्षत्राणां गतिमधिकृत्य कृतं शास्त्रं ज्यौतिषमुच्यते।[4]

ज्योतिषशास्त्रे यस्मिन् दिने ग्रहादीनां या भविष्यवाणी विधीयते सा प्रत्यक्षरूपेण दृश्यते।

प्रत्यक्षं ज्योतिषं शास्त्रं चन्द्रार्कौ यत्र साक्षिणौ

ज्योतिषशास्त्रे अन्यवेदाङ्गशास्त्रवत् विवादो नोत्पद्यते। अतैव वेदाङ्गशास्त्रेषु ज्यौतिषशास्त्रस्य प्राधान्यत्वमङ्गीक्रियते। अस्य ज्यौतिषशास्त्रस्य प्राधान्येन त्रयः स्कन्धाः सन्ति

सिद्धान्तः, होरा संहिता चेति।

आचार्यवराहमिहिरेणोक्तं बृहत्संहितायां यथा-

ज्योतिःशास्त्रमनेकभेदविषयं स्कन्धत्रयाधिष्ठितं

तत्कात्स्न्योपनयस्य नाम मुनिभिः सङ्कीर्त्यते संहिता।

स्कन्धेऽस्मिन् गणितेन या ग्रहगतिस्तन्त्राभिधानस्त्वसौ

होरान्योऽङ्गविनिश्चयश्च कथितः स्कन्धस्तृतीयोऽपरः।।[5]

वैदिकवाङ्मये दिग्ज्ञानम्-

भूतले नभस्तले वा कस्यापि नियतवस्तुनः क्षितिजनिर्देशार्थं किमपि गणितीयं विधानमावश्यकं भवति। पुराकाले भूपृष्ठस्थानां व्यवहार-प्रवर्तनाय स्थाननियमनार्थं कानिचित् साधनानि आविष्कृतान्यासन्। तेषामभिधानतः प्राक् दिग्परिभाषा दिगुत्पत्तिश्च वैदिकवाङ्मये केन रूपेण निर्दिष्टा वर्तते इति विविच्यते। ऋग्वेदसंहितायां पुरुषसूक्ते दिशामुत्पत्तिः विराटपुरुषस्य श्रोत्राभ्यां वर्णिता वर्तते। तद्यथा-

नाभ्या आसीदन्तरिक्षः शीर्ष्णो द्यौः समवर्तत।

पद्भ्यां भूमिर्दिशः श्रोत्रात् तथा लोकान् अकल्पयत्।।[6]

अत्र हि अन्तरिक्ष-द्युलोक-भूमिदिक्-लोकाः विराटपुरुषस्य केषां केषामवयवानां पूरकाः इति रूपकपद्धत्या प्रदर्श्यते। पुरुषस्य नाभिस्थाने अन्तरिक्षं, शीर्षस्थाने द्यौः, पदस्थाने भूमिः, श्रोत्रस्थाने दिशा, तथान्ये लोका अपि अनिर्दिष्टपुरुषाङ्गावयवा इति। अत्र सामान्येन दिशां निर्देशः विद्यते। उषा पूर्वस्यां सूर्यपथमेवानुगच्छतीति लिखितम्। उषा सकलानि भुवनानि स्वस्मात् प्रतीच्यामेव स्थापयति। तद्यथा-

एषा प्रतीची दुहिता दिवो नृन्योषेव निरिणीते अप्सः।

व्यूर्णवती दाश्रुषे वायार्णि पुनर्ज्योति युवतिः पूर्वचार्कः।।[7]

एवं ऋग्वेदे प्राचीप्रतीच्योर्निर्देशः चतसृणां दिशानाञ्च व्यवहारे प्रवर्तनमुपलभ्यते। यतोहि दिङ्निर्देशं विना स्थानद्वयस्य स्थितिं स्पष्टयितुं न शक्यते। अतः महर्षिणां दिङ्नियमनमतीवावश्यकमभवत्। तैत्तिरीयारण्यके स्पष्टमेव निर्दिष्टं यत् यत्र सूर्योदिति सा प्राची दिक्। एवं सर्वासां दिशां स्वरूपं भिन्नभिन्नोपादानप्रभवत्वेन वर्णितम्। तद्यथा-आपो वै इदं आसन् सलिलमेव। स प्रजापतिरेकः पुष्करपर्णे समभवत्। तस्य अन्तर्मनसि कामः समवर्तत इदं सृजेयमिति। .... तत आदित्य उदतिष्ठत्। सा प्राची दिक्। अथाऽरुणः केतुर्दक्षिणत उपादधात्। एवाह्यग्न इति। ततो वा अग्निरुदतिष्ठत्। सा दक्षिणा दिक्। अथाऽरुणः केतुः पश्चादुपादधात्। एवा हि वायो इति। ततो वायुरुदतिष्ठत्। सा प्रतीची दिक्। अथाऽरुणः केतुरुत्तरत उपादधात्। एवा हीन्द्रेति। ततो वा इन्द्र उदतिष्ठत् सोदीची दिक्। अथाऽरुणः केतुर्मध्य उपादधात्। एवा हि पूषन्निति। ततो वै पूषोदतदिष्ठत्। सेयं दिक्।

अथारुणः केतुरुपरिष्टादुपादधात्। एवा हि देवा इति। ततो देवमनुष्याः पितरो गन्धर्वाप्सरश्चोदतिष्ठन्। सोर्ध्वा दिक् याः विपुषो विपरायतन ताभ्योऽसुराः रक्षांसि पिशाचाश्च उदतिष्ठन्। तस्मात् ते पराभवन विप्रड्भ्यो समभवन्। ता एषाभ्यनूक्ता.....अद्भ्यो वै इदं समभूत्। तस्मादिदं सर्वं ब्रह्मस्वयम्भविति। तस्मादिदं सर्वं शिथिलम् इव अध्रुवमिव अभवत्। प्रजापतिर्वाव तत्। आत्मना आत्मानं विधाय तदेव आनुप्राविशत् तदेषाभ्यनूक्ता।

विधाय लोकान् विधाय भूतानि विधाय सर्वाः प्रदिशो दिशश्च।

प्रजातिः प्रथमजाः ऋतस्य आत्मानात्मनाभिसंविवेश।।[8]

ऋग्वेदे तत्परवर्तीसाहित्ये च दिशावबोधनाय दिक्च्छब्दस्य[9] प्रयोगोपलभ्यते। किञ्चित् स्थलेषु दिग्[10], आशा[11], काष्ठा[12], ककुभ[13], शब्दा अपि तदर्थे संयोजिताः वैदिकसाहित्ये दिक्शब्द आकाशस्यैकभागस्य सूचको वर्तते[14]।

प्राच्यादिचतसृणां[15] प्रमुखदिशां प्राधान्येनोल्लेकोऽस्ति। एतेषां परस्परं सम्मिश्रणेन चतस्रचोपदिशाः जायन्ते। उर्ध्वाधभागयोः सम्मेलनेन दिशः दशधाः।

प्राचीप्रतीच्यवाच्युदीच्योर्ध्वाधराणां षण्णां दिशां सहैव चतसृणामवान्तरदिशानामपि समुल्लेखोऽस्ति। यथा हि-

चतस्रो दिगश्चतस्त्रोऽवान्तरदिश उर्ध्वेयं नवमी दिङ्[16]

सूर्यसिद्धान्तानुसारं दिक्साधनं यथा-

शिलातलेऽम्बुसंशुद्धे वज्रल्पेऽपि वा समे।
तत्र शङ्कवङ्गुलैरिष्टैः समं मण्डलमासिखेत्॥
तन्मध्येस्थाप्येच्छङ्कुं कल्पनाद्वादशाङ्गुलम्।
तच्छायाग्रं स्पृशेद्यत्र वृत्ते पूर्वापरार्धयोः॥
तत्र बिन्दू विदायोभौ वृत्ते पूर्वापराभिधौ। **तन्मध्ये तिमिना रेखा कर्तव्या दक्षिणोतरा॥**
यामोत्तरदिशोर्मध्ये **तिमिना पूर्वपश्चिमा। दिङ्मध्यमत्स्यैः संसाध्या** विदिशस्तद्वदेव **हि**[17]॥

देश ज्ञानम्-

देश ज्ञानं नाम अक्षांश ज्ञानमिति। यदुपरि वयं तिष्ठामः तस्याः भूमेः कीदृशी आकृतिः केन रूपेन च सा स्थिता, अत्र देश-द्वीप-समुद्रपर्वतानां कीदृक् संस्थानमिति सर्व, तथा च भुवः समन्ताद् भ्रमतामाकाशीयपिण्डानां ग्रहनक्षत्रतारकाणाञ्च मार्गादिसम्बन्धनिर्देशोऽक्षांशज्ञानात् पूर्वम् आवश्यकम्। अतः प्रथमं भूमेस्स्वरुपविचारः आवश्यकः। आकाशे इयं ब्रह्मणोधारणात्मिकां शक्तिमादाय स्थिरा इति सूर्यसिद्धान्तसम्मतम्। एवं विषयेऽस्मिन् सौरमतम्-

मध्ये समन्तादण्डस्य भूगोलो व्योम्नि तिष्ठति।
विभ्राणां परमां शक्तिं ब्रह्मणोधारणात्मिकाम्॥[18]

सृष्टेः कालश्च पादोनद्वयार्बुदवर्षमितमिति आधुनिकाः मन्यन्ते। सूर्यसिद्धान्तरीत्या सृष्टेः कालः अर्बुदद्वयवर्षासन्नः इति। सा च सृष्टिः सौरमते लङ्कायां मध्यमरव्यर्धरात्रिकाले रविवासरे, ब्राह्ममते तु लङ्कायां सूर्योदये रविवासरे।

अत एव सूर्यसिद्धान्तानुसारेण अहर्गणद्वारा साधितग्रहाः लङ्कायामर्द्धरात्रिकालिकाः प्राक् सिद्ध्यन्ति। ब्राह्मपक्षे तु लङ्कायां सूर्योदये एव। पक्षद्वयमनुसृत्य जगति व्यवहारगणितः प्रचलति। इयं भूः वृत्ताकारेति, इत्यत्र युक्तिरियं प्राचीनानां यत्, यथा यथा नरः स्वस्थानात् उत्तरस्यां दिशि गच्छति तथा तथा ध्रुवतारोत्रतिर्जायते। ऋक्षमण्डलञ्च स्वखस्तिकतात् नतं दृश्यते। तेनैवनुभूयते यत् भूमौ समता नास्ति गोलकत्वमस्ति। एवञ्च यदि कश्चित् नरः स्वस्थानात् प्राच्यामुत्तरोत्तरं प्रचलेत् तदा कालान्तरे पुनः तदेव स्थानमाप्नोति। यथा इदानीं जलयानेन परिभ्रमता नरेण अस्य गोलकत्वं प्रत्यक्षमेवोपलब्धम्। अस्यां भूमौ अस्माकं पुरातनाचार्यैः महर्षिभिः भ्रमणवशात् योगदृष्ट्या वा ये देशाः पर्वताः समुद्राः द्वीपाश्च ज्ञाताः तेषां स्थितिः नामानि च पुराणेषु सर्वाणि समाहितानि। पुराणोक्तवचनान्येवाधृत्य तत्सर्वं सिद्धान्तशिरोमणौ गोलाऽऽध्याये भास्कराचार्योण गृहीतम्। यथा भूगोले पुरनिवेशमाह-

लंङ्का कुमध्ये यमकोटिरस्याः प्राक् पश्चिमे रोमकपत्तनं च।
अधस्ततः सिद्धपुरं सुमेरू सौम्येऽथ याम्ये वडवानलश्च॥
कुवृत्तपादान्तरितानि **तानि स्थानानि षड्गोलविदो वदन्ति।**
वसन्ति मेरौसुरसिद्धसङ्घा **ओर्वे च सर्वे नरकाः सदैत्याः॥**
यो यत्र तिष्ठत्यवनीं तलस्थामात्मानमस्या उपरि स्थितं च।
स मन्यतेऽतः कुचतुर्थसंस्था मिथश्च ये तिर्यगिवामन्ति॥
अधःशिरस्काः कुदलान्तरस्थाश्छायामनुष्या **इव नीरतीरे।**
अनाकुलास्तिर्यगधः**स्थिताश्च तिष्ठन्ति ते तत्र वयं यथात्र**॥[19]

जम्बूद्वीप मध्ये गिरिनिवेशवशेन नवखण्डानि सन्ति। यथा-

लङ्कादेशाद्धिमगिरिरूदग्हेमकूटोऽथ **तस्मात्**
तस्माच्चान्यो निषध इति ते सिन्धुपर्यन्तदैर्घ्याः।
एवं सिद्धादुदगपि पुराच्छृङ्गवच्छुक्लनीला
वर्षाणयेषां जगुरिह बुधा अन्तरे द्रोणिदेशान्॥
भारतवर्षमिदं ह्युदगस्मात् किन्नरवर्षमतो हरिवर्षम्।
सिद्धपुराच्च तथा कुरू तस्माद्धिद्धि हिरण्यरम्यकवर्षे॥
माल्यवांश्च यमकोटिपत्तनादोकमकाच्च किल गन्धमादनः।
नीलशैलनिषधावधी च तावन्तरालमनयोरिलावृतम्॥
माल्यवज्जलधिमध्यवर्ति यत् तत् तु भद्रतुरगं जगुर्बुधा।
गन्धशैलजलराशिमध्यगं केतुमालकमिलाकलाविदः॥
निषधनीलसुगन्धसुमाल्यकै रलमिलावृतमावृतमावभौ।
अमरकेलिकुलायसमाकुलं रूचिरकाञ्चनचित्रमहीतलम्॥[20]

काल ज्ञानम्-कालो नाम समयो वर्तते। कालोऽयं होराशब्दस्य ज्ञानाय मिलति। होराशब्दोऽयं अहोरात्र शब्दात् निष्पद्यते। यथोक्तं वराहमिहिरेण वृहज्जातके-

होरेत्यहोरात्रविकल्पमेके वाञ्छन्ति पूर्वापरवर्णलोपात्।[21]

मुख्यरूपेण सूर्यः एव कालमापकः उच्यते। प्रत्येक दिवसे सूर्यः आकाशे भोगकालः करोति, तेन च त्रिंशदभिः दिवसैः एकमासः जायते। षष्ठ्योत्तर रात्र्यंश च वर्षमैकं निष्पद्यते। एवं सर्वं कालाधीनमस्ति। देवानां कृते असुराणां कृते च मनुष्यानां एकवर्षं दिवस शब्देन मिलति। **अतः** सूर्यसिद्धान्तमतनुसारेण कालोऽयं सूर्यादिवसः मन्यते। सृष्ट्यादौ केवलं सूर्यः सृष्यन्ते अपि सः एव सूर्यः विराजते। अतः सूर्यस्य गतिः कालज्ञानेन मिलति। ज्यौतिषशास्त्रस्य आधारभूतं सिद्धान्तानां ज्ञानमेव तस्मिन् एव विहितं अस्ति। यतोहि ज्यौतिषशास्त्रमपि आदि शास्त्र मन्यते। परन्तु प्रत्येकयुगानां परिवर्तनेन कालः भेदः जायते। कालभेदे मुख्यरूपेण सूर्यः एव अङ्गीक्रियते तद्यथा-

शास्त्रमाद्यं तदेवेदं यत्पूर्वं प्राह भास्कर:।
युगानां परिवर्तनेन काल भेदोऽत्र केवल:।।[22]

काल: द्विविधम्-

1. अन्तकृतकाल: 2 कलनात्मककाल: चेति।

अन्तकृतकाल:-

लोकानाम् अन्तकृतकाल: संहारक काल: अपि मन्यते इस्यस्मिन् प्राणीमात्रस्य विनाश: दृश्यते। एवं जीवानाम् आचेतनम् प्राणीनाम् वा अन्तकृतकाल: विनाशकाल: भवति यद्यपि तादृश: काल: उत्पतिस्थितिकारक: तथापि विनाशस्य काल: प्रतिपादनाय अन्तकृत कालोऽयम् उच्यते यथा-

काल: सृजति भूतानि काल: संहरति प्रजा:।

कलनात्मककाल:-

कलनात्मककाल: गणनात्मककाल: इत्युत्यते। कलन शब्दस्य प्रयोग: गणनार्थं भवति। एवं कालस्य द्वितीयभेद: कलनात्मककाल: आयाति। कलनात्मकोऽयं खण्डकाल: अपि कथ्यते च ज्ञान विषयरूपेण अपि कालस्य कलनात्मककाल: प्रसिद्ध्यति। इत्यत्र सर्वं ग्रहणयोग्यं मिलति। सर्वं च ज्ञातुं शक्यते पुन: कलनात्मक: कालोऽयं द्विविधा मिलति।

1 स्थूलकाल: 2 सूक्ष्मकाल: चेति।

स्थूलकाल:-कलनात्मककालस्य प्रथमोभेद: स्थूलकाल: मन्यते इत्यस्मिन् व्यवहारिक कालज्ञानं मिलति। अत: व्यवहारे ग्रहणयोग्यकाल: स्थूलकाल: अस्ति। अत्र च महत्वपरिमानं दृश्यते, महत्वपरिमाणत्वात् च सम्पूर्णज्ञानविषय: समुत्पद्यते।

सूक्ष्मकाल:-कलनात्मककालस्य द्वितीयभेद: सूक्ष्मकाल: वर्तते। इत्यस्मिन् अमूर्तसंज्ञकज्ञानमऽपि ज्ञायते। मूर्तात् भिन्न अमूर्त: अणुत्व परिमाणात् सर्वज्ञानविषये स्पष्टयति एवं अणुत्वं परिमाणात् सूक्ष्मकालज्ञानं मूर्तसंज्ञकोऽपि अस्ति। तादृश: काल: च व्यवहारे न ग्रहणार्थमस्ति। एवं पुन: सूक्ष्मकालोऽयं द्विधा मूर्तामूर्तभेदाध्य: प्रसिद्ध्यति। अत: उभयो: अपि ज्ञानं कर्तव्यम्-

1 मूर्तकाल: 2 अमूर्तकाल: चेति।

मूर्तकाल:-मूर्तकाल: महानस्ति। अमूर्तकाल: च अणु: वर्तते। परन्तु मूर्तकाले क्रमगत ज्ञानं मिलति एवं व्यवहारे अपि अवलोक्यते व्यावहारिकज्ञानात् च अयं ग्रहणं योग्योऽस्ति।

अमूर्तकाल:-

न मूर्त: अमूर्त: इति मन्यते। अर्थात् यस्मिन् व्यावहारिकं ज्ञानं ग्रहणयोग्यं नास्ति, तत्रैव अमूर्तसंज्ञा आयाति। एवञ्च व्यावहारिकज्ञानम् उपहाय एव अत्र अणुत्वं विवज्ञायां न ग्रहणविषय: अस्ति। स्पष्टार्थं पद्यमेकमवलोक्यते-

लोकानामन्तकृत्काल: कालोऽयं कलनात्मक:।
स द्विधा स्थूलसूक्ष्मत्वान्मूर्तश्चामूर्त उच्यते।।[23]

एवं विज्ञाय मूर्तसंज्ञककाल: व्यवहारिककाल: अस्ति। अमूर्तश्च अव्यवहारिककाल: उच्यते, इति मत्वा एव सूक्ष्मकालप्रतिपादनमपि ग्रन्थावलोकनेन प्रसिद्ध्यति। तत्र प्रणादिषु मूर्त: ऋट्यादिषु च अमूर्तकाल: आयाति, एवमेव अत्रावधेयम् यथा-

10 दीर्घाक्षर उचारण काल:-1 प्राण:

6 प्राण:- $10 \times 6 = 60$ विपल

60 विपल = 1 पल

60 पल = 1 घटी (नाड़ी)

60 घटी = 1 अहोरात्र

30 अहोरात्र = 1 मास

12 मास = 1 सौरवर्ष

360 सौरवर्ष = 1 द्विव्यवर्ष

पादटिप्पणी

1. वेदाङ्ग ज्योतिषम् श्लो. सं. 4।
2. मुहूर्तचिन्तामणि, अध्याय-1, श्लो.-2 (पीयूषधाराटीका)
3. शब्दकल्पद्रुम, द्वितीय-काण्ड, पृ.सं.-550
4. पं.गङ्गाधर मिश्र विरचित ज्योतिष प्रबन्धमणिमाला, पृ.सं.-32
5. बृहत्संहिता, उपनयनाध्याय श्लोक-9, पृ. सं.-3।
6. ऋ. सं. 1/95/3। 7. ऋ. सं.-5/80/6।
8. तैतरीय आरण्यके-1/23/1-9,
9. ऋ. सं. 1/15/3, 10. वृ. आ. उपनिषद्-4/2/4,
11. ऋ. सं.-9/72/3-4, 12. ऋ. सं. 4/48/7,
13. ऋ. सं. 1/87/8, 14. अथर्व. सं. 3/39/4,
15. अथर्व. सं. 4/14/7-8, 16. सा. श्रौ. सू.-16/28/2,
17. सूर्यसिद्धान्त त्रिप्रश्नाधिकार श्लोक 1-4
18. सूर्यसिद्धान्ते भूगोलाध्याये श्लो.-32,
19. सि. शि., गोलाध्याये (भुवनकोशे) श्लो. 17-20
20. सि. शि., गोलाध्याये (भुवनकोशे) श्लो.-26-30,
21. वृहज्जातक अ. 1, श्लोक-8।
22. सूर्यसिद्धान्त मध्यमाधिकार श्लोक 9।
23. सूर्यसिद्धान्त मध्यमाधिकार श्लोक 10।

श्री अमित शर्मा, शोधच्छात्र: (ज्योतिषविभाग:)

राष्ट्रियसंस्कृतसंस्थानम्, वेदव्यासपरिसर:, बलाहर: (हि. प्र.)

ISSN 2456-3420

ज्योतिषशास्त्रस्य धर्मशास्त्रीया दृष्टिः

श्री ललितकुमार शर्मा

ज्योतिषशास्त्रस्य स्वरूपम्-

भगवतो वेदस्य नेत्रभूतं शुभाऽशुभकालविधायकं शुभाऽशुभफलज्ञापकञ्चेदं ज्योतिषशास्त्रम्। पारिभाषिकदृष्ट्या ग्रहनक्षत्राणां गतिमधिकृत्य प्रवर्तितं शास्त्रमिदं समेषां इहलौकिकानां पारलौकिकानां च धार्मिक लौकिककृत्यानां सम्पादकं वर्तते। अत एव पाणिनीय शिक्षायां ज्योतिषामयनं चक्षुः इति निगदितं वर्तते। वेदाङ्गज्योतिषे आचार्य लगधमुनिना सिद्धान्तशीरोमणौ आचार्यभास्करेण च सुपद्येन प्रतिपादितमस्य प्रयोजनम्।

''वेदाहि यज्ञार्थमभिप्रयुक्ताः
कालानुपूर्वा विहिताश्च यज्ञाः।
तस्मादिदं कालविधानशास्त्रं
यो ज्योतिषं वेद स वेदयज्ञम्।।

भारतीय संस्कृतौ ज्ञानस्याधारभूतैः वेदैः धर्मार्थकाममोक्षरूपाः चत्वारः पुरुषार्थाः स्थापिताः वर्तन्ते।

चक्षुष्स्वरुपवेदाङ्गस्यज्योतिषस्याऽपि परमंलक्ष्यं पुरुषार्थचतुष्ट्यप्राप्तिरेव-

''तस्माद्विजैरध्ययनीयमेतत्
पुण्यं रहस्यं परमं च तत्त्वम्।
यो ज्योतिषं वेद नरः स सम्यक्
धर्मार्थकामान्तलभते यशश्च।''

धर्मशास्त्रस्य स्वरूपम्- भारतीयसंस्कृतौ धर्मस्य महन्महत्त्वं वर्तते। चतुर्णां पुरुषार्थानां प्राप्तये धर्म एव प्रधानपुरुषार्थः वर्तते। कोऽयं धर्मः इत्यत्र बहूनि शास्त्रवचनानि समुपलभ्यन्ते। अर्थसंग्रहे लौगाक्षिभास्करेण ''चोदना लक्षणोऽर्थो धर्मः'' इति प्रतिपाद्य वेदोऽखिलो धर्ममूलं इति संकेतितम्। योगदर्शने तु यतोभ्युदयः निश्रेयसिद्धिः सह धर्मः इति। महाभारते महर्षिणा व्यासेन धर्मस्य प्रायोगिकं स्वरूपं प्रतिपादितं विद्यते। तत्र-

''धारणाद् धर्म इत्याहुः धर्मो धारयते प्रजाः।
स्याद्धारणसंयुक्तः स धर्मः इति निश्चयः''।।

''श्रूयतां धर्मसर्वस्वं श्रुत्वा चाप्यधार्यताम् आत्मनः प्रतिकूलानि परेषां न समाचरेत्।'' बस्तुतः धर्मस्य औचित्यानौचित्य विमर्शनाय भारतीय सांस्कृतिकपरम्परायां विविधाः धर्मशास्त्रीयाः पौराणिकाः स्मृत्यः सूत्रग्रन्थाश्च वर्तन्ते। तत्र स्मृतिग्रन्थेषु आचार्याः आहुः-

''धृतिक्षमादमोऽस्तेयं शौचमिन्द्रियनिग्रहः।
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम्।।''

सारांशतया इदमेव वक्तुं शक्यते यत् श्रुतिस्मृति प्रतिपाद्यकर्मणां निष्ठापूर्वकं सदाचरणं धर्मस्य मौलिकस्वरुपं वर्तते।

ज्योतिषशास्त्रस्य धर्मशास्त्रीया दृष्टिः-

इह जगति सर्वत्र सर्वेषां इहलौकिक-पारलौकिक-यज्ञानाम् अनुष्ठानाय शुभाऽशुभकाल निर्धारिणं ज्योतिषशास्त्रेण क्रियते। तथा च शुभाऽशुभकर्मणः अनुष्ठानविधानं नियमभागश्च धर्म शास्त्रेण सम्बन्धः वर्तते। यथा-

1. जन्मनः आरभ्यः मृत्युपर्यन्तं ये षोडशसंस्काराः प्रतिपादिताः सन्ति तेषां समेषां संस्काराणां कालविधानं मुहूर्त्तज्ञापनं च ज्योतिषशास्त्रेण एव क्रियते।
2. सिद्धान्तज्योतिषेन निर्मित पंचाङ्गाधारेण एवं सर्वेषां धर्मशास्त्रीयानां व्रतपर्वानुष्ठानादीनां कालनिर्धारणं विधीयते।
3. अशौचादीनां निर्धारणे तिथिवारयोः गणनायाम् उभयोः सम्बन्धः वर्तते।
4. जातकस्कन्धे नवम दशम भावयोः धर्मकर्मणोः परस्परसम्बन्धः राजयोगः प्रतिपादितः वर्तते। अर्थात् धर्माश्रितेन कर्मणा जनः राजतुल्यं शुभफलमाप्नोति। यथा-

   ''कर्मधर्माधिनेतारावन्योन्याश्रयसंस्थितौ।
   राजयोगाविति प्रोक्तं विख्यातो विजयी भवेत्।।''

5. विविधखगोलीयघटनानां कालनिर्धारणं ज्योतिषशास्त्रेण निर्णीयते। यथा सूर्यचन्द्रग्रहणयोः पूर्वापरकाले कृत्याकृत्य विवेचनं संक्रान्तिकाले धर्मनुष्ठानं धर्मशास्त्रेण निर्णीयते।
6. प्राचीनकाले नक्षत्रानुरोधेन अग्न्याधानसंस्कारः धर्मशास्त्रे प्रतिपादितः वर्तते। तदर्थ स्पष्टतिथिज्ञानं महत्वपूर्णं भवति।

7. अधिमासः क्षयमासयोः धर्मशास्त्रीय महत्त्वं शुभाऽशुभकर्मणां निर्धारणं वर्तते। यथोक्तं च?

''सर्वगंगासमंतोयं सर्वं सवर्णमयं दानम्''।

8. बहवः तादृशाः आचार्याः भारतीयापरम्परायां सन्ति यैः ज्योतिष धर्मशास्त्रयोः सम्बन्धः स्थापितः। यथा महर्षि पराशरः जैमिनि, व्यासः, कमलाकरभट्टः, वशिष्टः इत्यादयः।

9. पुराणानामवलोकनेन इदं निर्णीतमस्ति यत् प्रत्येकस्या तिथिस्वामिनः तथा तिथिना सह महत्वपूर्णः सम्बन्धः वर्तते। विविध कथानकमाध्यमेन भविष्यपुराणेऽपि प्रतिपादितमस्ति।

10. ज्योतिषशास्त्रस्य अष्टादश प्रवर्तकेषु बहवः आचार्याः धर्मशास्त्रविदः एव।

11. अस्माकं धर्मशास्त्रे धर्मानुचरेण अभिवादनशीलस्य जनस्य आयुर्विद्यायशोबलानां वर्धापनं इत्थं प्रतिपादितम् अस्ति। तद् यथा–

ज्योतिषशास्त्रेऽपि ग्रहजन्यारिष्टशान्तये देवब्राह्मणः विद्वत्जनानाम् अभिवादनं सेवनं च प्रतिपादितम् अस्ति। तत्र जातकशास्त्रे ग्रहाणां प्रतिकूलशमनार्थं धर्माचरणम् एव उपायः वर्तते।

12. नारदेन प्रोक्तं यत् सर्वाः श्रौतस्मार्तक्रियाः ज्योतिषं विना न सिद्ध्यन्ति। नारदसंहितायाम् उक्तं च।

''वेदस्य निर्मलं चक्षुः ज्योतिः शास्त्रमकल्मषम्।

विनैतदखिलं श्रौतं स्मार्तं कर्म न सिद्ध्यति।।''

13. तिथीनां प्रारम्भसमाप्तिवशात् व्रतपर्वादीनां साधुत्वमसाधुत्वं वा सम्पाद्यते। अतः यावत् पर्यन्तं स्पष्टकालानुरोधेन ज्योतिषशास्त्र द्वारा तिथि ज्ञानं न भवति, तावत् पर्यन्तं धर्मशास्त्रानुसारेण अनुष्ठानं कर्तुं न शक्यते।

इत्थम् उपरोक्तैः विविधैः कारणैः निश्चिततया वक्तुं शक्यते यत् उभयोः शास्त्रयोः परं लक्ष्यं लोककल्याणमेव।

श्री ललितकुमार शर्मा, शोधच्छात्रः

राष्ट्रियसंस्कृतसंस्थानम्, वेदव्यासपरिसरः, बलाहरः (हि. प्र.)

ISSN 2456-3420

आत्मघातप्रेरकग्रहस्थितिविमर्शः

श्री कंविराजः

भारतीयवैदिकसाहित्ये ज्योतिषस्य अद्वितीयं स्थानं वर्तते। अस्य शास्त्रस्य कालनिर्धारणे महती उपयोगिता वर्तते। तथैव आत्मघातः अद्यत्वे एका वृहत्तरा समस्या समाजस्य समक्षं वर्तते। जनाः कदा आत्मघातं कुर्वन्ति? तदा ग्रहाणां काः स्थितयः भवन्ति? ग्रहाणां प्रभावाद् कदा कीदृशि स्थिति उत्पद्यते? इत्यादि प्रश्नानां समाधानं पिडितजातकस्य कुण्डलीं दृष्ट्वा वा ततः पूर्वं कृत-आत्मघातप्रयासः येन जातकेन तस्य कुण्डलीं दृष्ट्वा वयम् आत्मघातप्रेरकग्रहाणां परिस्थितिं द्रष्टुं शक्नुमः।

आत्मघाताय प्रयासः एकः मानसिकविकारः वर्तते। अयं मनोविकारः समाजिकविघटने पारिवारिकविघटने च मुख्यां भूमिकां धरति। यत्र कुत्रापि समाजे वा देशे विदेशे कोऽपि जातकः आत्मघातं करोति चेत् तस्य प्रभावः सम्पूर्णसमाजोपरि भवति। ये जनाः मानसिकविकारेण ग्रस्ताः भवन्ति तेषां चिन्तनं तु आत्मघातादि घटनां श्रुत्वा इतोऽपि वर्धते। तेषां चिन्तनं भवति यत् किमयमेव मार्गः अस्ति वा संसाराद् मुक्तिं प्राप्तुम्। परन्च एवं नास्ति। अत्र प्रश्नाः उत्पद्यन्ते यत् एते मनोविकाराः कथं मानवानां मनसि आयान्ति? तदा ग्रहाणां काः स्थितयः भवन्ति? इत्यपि ज्ञानं विधेयं यतोहि ग्रहाः एव सर्वविधपरिस्थितीनां निर्माणं कुर्वन्ति। उक्तमपि अस्ति यत् ग्रहाधीनं जगत्सर्वम्।

विद्यालयस्य कश्चन छात्रः विद्यालयैव आत्मघातास्य प्रयासं करोति चेत् तस्य प्रभावः विद्यालयस्य अन्यछात्राणामुपरि अपि भवति। तथैव कश्चन सामाजिकरीत्या उन्नतः बहुचर्चितः आत्मघाताय प्रयासं करोति तदा तस्य कर्मणः प्रभावः समाजे अपि भवति। अद्यत्वे विस्फोटकान् धृत्वा बहवः आत्मघातप्रयासं कुर्वन्ति। एतादृशाः प्रयासा नूनमेव सामाजिकविकारान् उत्पादयन्ति। अत्रापि कुण्डल्यां वा जातकपत्रे ज्योतिषानुसारं ग्रहाणां स्थितिः द्रष्टव्या भवति यत् कासु स्थितिषु जातकः कया रीत्या आत्मघातस्य प्रयासं करिष्यति।

बहवः अमुं स्थितिं परिशील्य विचलिताः भवन्ति। आत्माघात प्रेरकाः पारिवारिकाः वा सामाजिकाः परिस्थितयः काः? परन्तु ज्योतिषाधारेण सामाजिकरीत्या संवेदनशीलां इमां गतिविधिं परिशील्य तन्निवारणस्य प्रयासः कर्तुं शक्यते। अयं विकारः स्वकीयं प्रभावं व्यक्तिगतरूपेण तथा च सामाजिकरूपेण पारिवारिकरूपेण च दर्शयति।

आत्मघातपरिस्थितयः ग्रहविमर्शश्च-

माता सत्याः आत्मघात विमर्शः-प्राचीनकालादारभ्यः वस्तुतः बहुनि आत्मघातस्य उदाहरणानि मिलन्ति। तेषु माता सत्याः आत्मदाह द्वारा आत्मघातस्य कृत्यं बहुचचितं वर्तते। अत्र प्रश्नोऽयं उत्पद्यते यत माता सती किमर्थमात्मदाहं कृतवती। तत्र याः परिस्थितयः उत्पन्नाः भवन्ति ताः परिस्थितयः गृहैः उत्पादिताः आसन् वा? आम् तदैव सा स्वकीयं शरीरं यज्ञे आहुत्वति। सर्वप्रथमं तु माता सती भगवतः शिवस्य आज्ञायाः अवहेलनां करोति यदा सा स्वीकयगृहं गच्छति। पुनः यदा सा स्वकीयं गृहं प्राप्नोति तत्र कोऽपि तया सह वार्तां न करोति ग्रहपरिस्थितयः एव तत्र आत्मदाहस्य कारणं आसन्। किम् एषा परिस्थिति गृहैः निर्मितासीत् वा? आम् यतोहि गृहैव सर्वविधकर्मणां कारकाः भवन्ति। एवमेव वर्तमान परिप्रेक्षे पश्यामश्चेत् भारते एकस्मिन् वर्षे एक लक्षतः अधिकाः जनाः प्रतिवर्षं विभिन्नकारणैः आत्मघातं कुर्वन्ति। तत्र यानि कारणानि भवन्ति तानि अस्माभिः अवलोकनियानि।

(ख) गृहहिंसा-गृहाहिंसापि सम्पूर्णविश्वे आत्मघातस्य मुख्यकारणं विद्यते। गृहहिसायां नारयः एव आत्मघातस्य प्रयासं कुर्वन्ति। येन अन्ततोगत्वा जातकः आत्मघातं करोति वा अस्मिन् विषये चिन्तयति। अत्रस्माभिः ज्ञातव्यं यत् कदा कस्य ग्रहस्य दशायां हिंसायाः उत्पत्तिः भवति। कस्मिनपि परिवारे हिसांयाः वातावरणमस्ति चेत् तत्रापि तेषु जनेषु कः आत्मघातं करिष्यति। यः मानसिकावसादेन पिडितो भविष्यति। तत्र अवसादस्य वा अशान्तस्य कारकः कः ग्रहः भवति यस्य दशायां जातकः आत्मघाताय प्रेरितो भवति। अस्मिन् परिप्रेक्ष्ये चिन्तनमावश्यकम्।

(ग) प्रेमसम्बन्धः तथा च गृहपरिस्थितयः-वस्तुत वर्तमान-समये युवजनेषु विवाहसम्बन्धे वा प्रेमप्रसङ्गे विफलता आत्मघातस्य कारणं वर्तते। सम्बन्धविच्छेदः जातकं आत्मघातं प्रति नयति। तथापि परस्परः विवाहिततियुगलेषु मतभेदादपि एषा समस्या उत्पद्यते। अत्र सर्वप्रथमं विवाहसम्बन्धे विफलतायाः यानि कारणानि तानि 1. वर्णव्यवस्या, 2. गृहपरिस्थितयः इत्यादिनि सन्ति। वैदिककालादार-भ्यैभारते वर्णव्यवस्थायाः प्रचलनं वर्तते। भिन्नवर्णेषु विवाहः न भवति। अतः भारतीयाः तस्यैव परम्परायाः अनुकरणं कुर्वन्ति। प्रेमप्रसङ्गे अपि विफलतायाः एतादृशानि कारणानि सन्ति। तत्र ज्योतिषानुसारं द्रष्टव्यमस्ति यत् कदा जातकः कस्य ग्रहस्य दशाऽन्तरदशायां प्रेमप्रसङ्गे विफलो भवति। कस्य ग्रहस्य दशाऽन्तर दशायां भिन्नवर्णे प्रेमसम्बन्धं स्थापिष्यति। कदा विवाहे केषां ग्रहाणां दशाऽन्तरदशायां वर्णादि समस्या आगमिष्यति तथा च तदा ग्रहाणां काः स्थितयः भवन्ति याः ताजकान् आत्मघाताय प्रेरयन्ति। एतादृश्यः स्थितयः जातकपत्रिकायां द्रष्टव्याः भवन्ति।

(घ) वितीयकारणम्-बहवा: जना: वित्तकोषात् धनं स्वीकुर्वन्ति। परञ्च तस्य धनस्य प्रतिसमर्पणे ते समर्था: न भवन्ति। तत्र कारणं सामर्थ्ययानुसारं कार्यस्य अभाव: भवति। येन वित्तोपार्जनं न भवति। जना: साहुकारात् वा ऋणदातृसंस्थाभ्य: ऋणं स्वीकुर्वन्ति। पुन: ऋणश्च सूदं दातुं समर्था: न भवन्ति। पुन: अवसादग्रस्तो भुत्वा आत्मघातं कुर्वन्ति। अत: जातकपत्रे ग्रहाणां स्थितिं दृष्ट्वा एव ऋणं स्वीकर्तव्यं भवति। जातकस्य कृते उत्तमस्य कालस्य आवश्यकता भवति यदा स: ऋणं स्वीकुर्यात्। अत: जन्मपत्रस्य अवलोकनमावश्यकं भवति एतादृशेषु कार्येषु।

(ङ) शिक्षा-भारते छात्राणां आत्मघातस्य समस्या नास्ति कोऽपि नूतना वार्ता। शिक्षायां उत्तमोत्तमप्रदर्शनस्य इच्छा, कक्षायां छात्रेषु उत्तमं स्थानं भवेत्, एतादृशासु आकांक्षासु विफलास्सन्, अभिभावकानां आंकाक्षानुसारं छात्रस्य प्रदर्शनं न भवति चेत् प्रथमं तु चिन्ताया: द्वितीयं अवसादस्य कारणाद् छात्र: आत्मघातं करोति। अत्र एतादृशेषु कारणेषु गृहपरिस्थितय:, पाठशालाया: परिस्थितय:, आत्मपरिस्थितय:, आत्मघातस्य प्रमुखानि कारणानि सन्ति। अत्र पूर्वं द्रष्टव्यं भवति यत क: ग्रह:कस्य कारक: वर्तते। केन ग्रहेण कस्य वा ग्रहस्य एतादृशी स्थिति भवति येन जातकस्य इच्छा भवति यत् अहं कक्षायां प्रथमागमिष्यामि पुन: यदि स: प्रथमस्थानं न प्राप्नोति चेत् ग्रहाणां का स्थिति उत्पन्ना भवति। येन स: आत्मघातं प्रति प्रेरित: भवति।

(च) मादकद्रव्यानां सेवनं सुरापानञ्च-मादकद्रव्यानां सेवनेन समाजस्य सर्वतर्गेषु जना: प्रभाविता: सन्ति। मादकद्रव्यानां सेवनं कृत्वा ये जना: आत्मघातं कुर्वन्ति तेषु मानसिकासंतुलनम्, दीर्घकालाद् अवसादग्रस्ता:, मादकौषधीनां प्रयोगेण मतिभ्रम:, मादकद्रव्यानां क्रयणे वित्तस्याभाव:, एतानि आत्मघातस्य मुख्यकारणानि। अत्र मनोविज्ञानशास्त्रेण जातकस्य मनोस्थितीनां अध्ययनं कृत्वा कदा कस्यां स्थितौ जातक: आत्मघातं करोति ज्ञातुं शक्यते एक: विषय: परञ्च ज्योतिषाधारेण यदि कश्चन जातक: सुरापानं करोति तदा कदा ग्रहाणां कदा दशाऽन्तरदाशावशादेतादृशी स्थित्युत्पद्यते येन जातक: आत्मघाताय प्रेरितो भवति। तथैव मादकौषिधीनां प्रयोग: ये जातका: कुर्वन्ति तेषां कदा एतादृशी स्थिति आयाति। एतदर्थं एतस्य ज्ञानं ग्रहाणां स्थिति द्वारा कर्तव्यं भविष्यति यत् के जना: मादक द्रव्यानां सेवनं जीवने करिष्यन्ति। पुन: तस्या समस्याया: समाधानं पूर्वमेवकथं कर्तुं शक्यते। तादृशी स्थिति कदा आयाति ग्रहविमर्शेन एतद् ज्ञातव्यम्।

(छ) मानसिकरोगै: पिडिता: जना:-मानसिकरोगै: ग्रस्ता: जना: आत्मघातादि कृत्येषु बहुधा भवन्ति। तेषु मुख्यरूपेण एतादृशा: जना: भवन्ति ये दु:कार्येण कलंकिता: भवन्ति। पुन: जडताया: कारणाद् आत्मघातं कुर्वन्ति। मानसिकरूपेण रूग्णा: जना: विभन्नकारणै: आत्मघातादि कार्यं कुर्वन्ति। गत् 2014 तमे वर्षे भारतैव 7104 जना: मानासिकरोगै: ग्रस्ता: आत्मघातं कृतवन्त:। परन्तु ज्योतिषानुसारं ग्रहाणां दशाऽतरदशावशादेव जना: सर्वविद्कार्याणि कुर्वन्ति। ज्योतिषानुसारं चन्द्रमा ग्रह: मनस: कारक: भवति। चन्द्रमा ग्रहस्य केन ग्रहेण सह दृष्टिवशात् दशान्तरदशायां जातक: आत्मघातं करिष्यति। अत्र सा स्थिति विमर्शेण ज्ञातव्यास्ति येन जातक: आत्मघाताय प्रेरित: भवति। एतानि सप्तकारणानि कथमुत्पद्यन्ते। ग्रहविमर्शेन एता: स्थितय: ज्ञातव्या: सन्ति।

समाधानस्य सामाजिकोपयोगिता-अस्या: समस्याया: समाधानं समाजकल्याणाय नितरामपेक्षत एव। कदा केन ग्रहेण पिडितो भूत्वा जातक: आत्मघातं करोति। अनेन पूर्वमेव एतस्य ज्ञानं कर्तुं शक्यते। अयं ग्रहविमर्श: समाजकल्याणाय एक: उत्तम: प्रयास: भविष्यति। ग्रहानुसारं जातकस्य गतिविधिं परिशील्य पूर्वमेव अवधानं कृत्वा तां स्थितिं परिवर्तयितुं शक्यते।

समाजिकरूग्मताया: समाधानं समाजकल्याणाय नितरामपेक्षते व्यक्तिगतरूपेणक्रियमाणानामात्मघातप्रयासानां प्रभाव: अतिशयेन समाजस्योपरि भवत्येव।

अत: ग्रहाणां स्थितिवशात् आत्मघातप्रेरकपरिस्थितय: अध्ययनेन सम्मुखमायान्ति चेत् तदाधारेण, मनोविज्ञानशास्त्रस्य, समाजशास्त्रस्य, मानविकी शास्त्रस्य च परिमार्जनं परिवर्धनं तु भवत्येव। अयं प्रयास: यदि सफलो भवति चेत् विभिन्नविषयेषु परस्पराध्ययनमनुसन्धानं च भवितुमर्हति। शिक्षाजगति मानवकल्याणदृशा नूतनपाठ्यांशानामपि निर्माणं भवितुमर्हति। अधध्यन बलात् प्राचीनसाहित्यस्यापि नवीनदृशा अध्ययनं भवितुमर्हति।

सम्भावितानिष्कर्ष:-आत्मघातप्रेरकग्रहस्थितिविमर्श:, अत्र ग्रहाणां सर्वविधपरिस्थितीनां अवलोकनं कृत्वा कदा का: परिस्थिय: उत्पद्यन्ते एतदेव अस्ति अस्य लेखस्य निष्कर्ष:। पुन: ग्रहस्थितीनां ज्ञानेन मानव: कदा कस्मिन्नवसरे केन ग्रहेण प्रेरितस्सन् कस्मिन् मार्गे स्वात्मानं पीडयितुं स्वशरीरं त्यक्तुं वा बलात् प्रयत्नं करिष्यति। अनेनाध्ययनेन स्पष्टं भविष्यति। अध्ययनफलमिदं ग्रहपीडोपशमने परामर्शप्रदाने च महत्वपूर्णं स्थानं प्राप्स्यति। अपि च ज्योतिषशास्त्रकारणादपि समाजाय शुभप्रद: एव भविष्यति।

श्री कविराज:, शोधछात्र: ज्योतिषविभाग:

राष्ट्रियसंस्कृतसंस्थानम्, वेदव्यासपरिसर:, बलाहर: (हि. प्र.)

ISSN 2456-3420

वास्तुशास्त्रस्य ज्योतिषाङ्गरूपेण समुद्भवो विकसनञ्च

श्री संदीपकुमारः

वास्तुशास्त्रं ज्योतिषशास्त्रस्य विशिष्टशाखात्वेन परिगण्यते। वास्तु-ज्योतिषशास्त्रयोर्मध्ये अङ्गाङ्गिभावसम्बन्धाद् वास्तुसम्बन्धिचिन्तनं शास्त्रस्यास्यान्तर्गते मुख्यविषयरुपेण गृह्यते। सर्वेषां शास्त्राणां मूलं प्रयोजनमस्ति ''वैदिकसंज्ञानसंप्राप्तिः'' मानवमात्रस्य सौविध्यं संरक्षणञ्च शास्त्रैरेतैः श्रेष्ठो सम्भवति।

वास्तुशब्दः आवासार्थकोऽस्ति ''वस् निवासे'' इति धातोः तुण् प्रत्यये विधीयमाने वृद्धौ सत्यां निष्पन्नोऽयं वास्तुशब्दः।

अमरकोशेऽपि ''वेश्मभूर्वास्तुरस्त्रियाम्'' इति समुद्धृतमस्ति। पाश्चात्यविदुषः मोनियरविलियम्समहोदयस्यानुसारेण वास्तुशब्दस्यार्थः "The Site or foundation of a house site, around, building or dwelling place."[1]

इत्ययं स्पष्टीभवति यद् वास्तुशब्दो निवासार्थकत्वेन गृह्यते।

वैदिककालादेव वास्तुकलाप्रयोगः यागादिकार्येषु पूर्णतया क्रियमाणोऽस्ति। वैदिकसाहित्येऽपि बहुत्र वास्तुविषयकं चिन्तनं समुपस्थापितमस्ति। कल्पसूत्रान्तर्गतेषु शुल्वसूत्रेषु वैदिकयागस्य यज्ञवेदिनिर्माणनियमानां वर्णनं प्राप्यते। अयमेव प्रासादनिर्माणप्रक्रियायाः आधारोऽस्ति। इत्थमेव ज्योतिषशास्त्रेण सह शुक्राचार्येण स्वनीतिसारे द्वात्रिंशत्संख्याकासु विद्यासु शिल्पविद्यायाः गणना कृता। भारतीयवास्तुविधायाः वेदैः सह प्रकारद्वयेन सम्बन्धोऽस्ति। तस्य विस्तरत्वादत्रावर्ण्यमानमस्ति।

भारतीयज्ञानविज्ञानस्यैतद् वैशिष्ट्यमस्ति यद्भारते सर्वविधविज्ञानस्य मूले धर्मः एव विद्यते। एतदेव कारणं यद् भारतीयविचारकैः शब्दब्रह्मवाद-रसब्रह्मवाद-नादब्रह्मवादादीनां कल्पना कृता। तथैव अस्माकं ऋषिभिः वास्तुब्रह्मवादं परिकल्प्य भारतीयवास्तुकलायां जीवनस्य नवसंचारो विहितः।

भारतीयशिल्पशास्त्राणां कर्त्तारो ये ऋषयो मुनयश्च आसन् ते स्वशिल्पशास्त्रेषु केवलं सैद्धान्तिकं ज्ञानमेव न ग्रथितवन्तोऽपितु विविध शैलिसमन्वितानां प्रसादानां भवनानां विविधजातिकविमानानाञ्च निर्माणमपि कृतवन्तः।

वैदिककालीन वास्तुः-प्रासादस्य भवनस्य वा दृष्टिद्वयं वर्तते-प्रथमादृष्टिः आकृतिः द्वितीया च प्राणाः सन्ति। देवप्रासादो निराकार-ब्रह्मणो विराटपुरुषस्य साकारा प्रतिमा अस्ति। ऋग्वेदे ययोः देवयोः सङ्केतः प्राप्यते तौ वर्तेते वास्तोष्पतिः विश्वकर्मा च''। एतयोः देवयोः सम्बन्धः जायमानया प्रासादरचनया देवप्रतिष्ठया च साकं भवति। विश्वकर्मा आर्यवास्तुकलायाः प्राचीनतमः आदिभूतश्च स्थपतिर्वर्तते। महाभारते मयासुरेण निर्मितानां प्राचीनतमः भवनानाम् उपाख्यानेन वयं सुपरिचिता एव। वास्तोष्पतिविषये वयमेतज्जानीमो यदस्माकं देशे पञ्चसहस्त्रवर्षेभ्यः एषा सनातनी परम्परा अस्ति। कस्यापि भवनानामारम्भो वास्तोष्पतिमन्त्रं विना न भवितुं शक्यते। कश्चनापि वास्तुविन्यासो न प्रारब्धुं शक्यते। अयमेव वास्तोष्पतिदेवो वास्तुपुरुषरुपेण वास्तुब्रह्मरुपेण च प्रतिष्ठितोऽभवत्। ज्योतिषशास्त्रस्य स्कन्धत्रयेषु संहितायाः अन्तर्गते वास्तुविषयो विचिन्त्यमानो भवति संहितासम्बन्धिविविधेषु ग्रन्थेषु वास्तुशास्त्रसम्बन्धिनी चर्चा कृताऽस्ति वास्तुशास्त्रेऽपि ज्योतिषशास्त्रस्य सिद्धान्तानां प्रयोगः क्रियते। अत एव ज्योतिषशास्त्रस्य संहितास्कन्धे एव वास्तुशास्त्रमन्तर्भवति।

वास्तुशास्त्रस्य प्रत्येकं पक्षे ज्योतिषशास्त्रं मूलत्वेन विराजते। वास्तुशास्त्रीय-सिद्धान्तेषु दिक्साधनमप्येकोऽस्ति दिक्ज्ञानमेव वास्तुशास्त्रस्य मूलं मन्यते यतोहि दिङ्मूढ़े सति वास्तुसम्मतनिर्माणस्य कल्पना न भवति। ग्रहाणां दिक्स्वामित्वं वास्तुशास्त्रे अवश्यमेव ज्ञेयम् यथोच्यते-

भानुः शुक्रः क्षमापुत्रः सैंहिकेयः शनिः शशिः।
सौम्यस्त्रिदशमन्त्री च प्राच्यादिदिगधीश्वराः।।[2]

एवमेव भवननिर्माणसमये वास्तुचक्रविचारः क्रियते तस्मिन् वास्तुचक्रे वास्तुपुरुषस्य शरीरे नक्षत्राणि न्यस्यन्ते। नक्षत्राणां न्यासक्रमे सूर्यात् गणनाक्रमः समारभ्यते। वास्तुपुरुषस्य विभिन्नेष्वङ्गेषु खननारम्भस्य फलमपि वर्ण्यते। यतोक्तमस्ति विश्वकर्माप्रकाशग्रन्थे-

वास्तुचक्रं प्रवक्ष्यामि यच्च व्यासेन भाषितम्।
यस्मिन्नृक्षे स्थितो भानुस्तदादौ त्रीणि मस्तके।।

चतुष्कमग्रपादे स्यात् पुनश्चत्वारि पश्चिमे।
पृष्ठे च त्रीणि ऋक्षाणि दक्षकुक्षौ चतुष्टकम्।।
पुच्छे चत्वारि ऋक्षाणि कुक्षौ चत्वारि वामतः।
मुखे भत्रयमेव स्युरष्टविंशतितारकाः।।
शिरस्तारा‌ग्निदाहाय **गृहोद्वासोऽग्रपादयोः।**
स्थैर्य स्यात् पश्चिमे पादे पृष्ठे चैव धनागमः।।
कुक्षौ स्याद्दक्षिणे लाभः पुच्छे च स्वामिनाशनम्।
वामकुक्षौ च दारिद्रयं मुखे पीडा निरन्तरम्।।
पुनर्वसौ नृपादीनां कर्तव्यं सूतिकागृहम्।
श्रवणाभिजितोर्मध्ये प्रवेशं तत्र कारयेत्।
चरलग्ने चरांशे च सर्वथा परिवर्जयेत्।।[3]

वस्तुतस्तु ज्योतिषशास्त्रस्य सम्यग् ज्ञानं विना वास्तुशास्त्रस्य ज्ञानमपूर्णमेवास्ति। स्थापत्यलक्षणेऽपि ज्योतिषशास्त्रं अष्टस्वङ्गेषु परिगण्यते। सर्वेषामपि वेदाङ्गानां मूलप्रवर्तको ब्रह्मा वर्तते अतः ज्योतिषवास्तुशास्त्रयोः अङ्गाङ्गिभावसम्बन्धो मन्यते तत्र च अङ्गी ज्योतिषशास्त्रम् अङ्गञ्च वास्तुशास्त्रमस्ति।

वास्तुशास्त्रस्यविकासः-कस्यापि-राष्ट्रस्य प्राचीनस्थापत्येन साहित्येन च तद्राष्ट्रस्य संस्कृति-विषये ज्ञानं भवति शिल्पस्थापत्यं मानवजीवनस्य महत्वपूर्णमङ्गमस्ति। ''भारतीयस्थापत्यस्य प्रादुर्भावो जातः कदा?'' इत्यस्मिन् विषये ज्ञानाय प्राचीनसाहित्यस्यावलोकनम-निवार्यमस्ति। ऋग्वेदस्य सप्तमे मण्डले स्तम्भयुक्तगृहं वर्णितमस्ति। ऋग्वेदे वास्तुशास्त्रस्याद्याचार्यानां अगस्त्यादीनाम् उल्लेखः प्राप्यते। अतः वक्तुं पारयामः यत्स्थापत्यकलायाः जन्म ऋग्वेदात् पूर्वमेव अभवत् यद्यपि शास्त्रमिदं प्राचीनविद्यास्थानेषु स्वतन्त्रविधारुपेण न परिगणितम्। प्रासादस्य अर्थो भवति-''सदनं सादः, प्रकर्षेण सादः प्रासादः। यत्र मानं, मापनं, धामविन्यासपुरस्सरं नियमबद्धञ्च इष्टिकाचयनं निष्पन्नं भवति तदेव प्रासादरुपेण अवगन्तुं शक्यते स एव चितिरुपेण चैत्यरुपेण चाभिधीयते। मूलाधारस्यास्य मूल्याङ्कनेन संज्ञायते यत् सर्वां अपि वास्तुकृतयो वैदिकपरम्परया प्रभावितास्सन्ति। ग्राम-नगर-कुल-गोत्रेत्यादिषु वैदिककालीनवास्तोः सम्बन्धः उत्कृष्टतया सम्वर्णितोऽस्ति।[4]

उपर्युक्त विवेचनेन सिद्ध्यति यत् वास्तुः ज्योतिषशास्त्रस्याङ्गं वर्तते।

पादटिप्पणी

1. M.Monier Williams Sanskrit English Disctionary.
2. सारावली-४/८
3. विश्वकर्मप्रकाशः ३/१२-१८
4. देवप्रासादवास्तुविधानम् पृ. सं. १९, २०।

श्री संदीपकुमारः, शोधच्छात्रः
राष्ट्रियसंस्कृतसंस्थानम्, वेदव्यासपरिसरः, बलाहरः (हि. प्र.)

ISSN 2456-3420

नारायण दशा द्वारा फलित ज्योतिष में अनुसन्धान के अवसर

श्री आशीष भगोरिया

नारायण दशा की विशेषताएं-

ज्योतिष में दशा उतनी ही महत्वपूर्ण है जितनी घड़ी में सही समय का होना। जिस प्रकार काल अनंत है, यह निरंतर अग्रसर रहता है और उसे रोक पाना असम्भव है लेकिन यदि काल को किसी भी समय से प्रारंभ कर के उसको एक समय सीमा तक नापा जाय तो काल की अवधि निर्धारित की जा सकती है। यह अवधि सूक्ष्म अथवा दीर्घ हो सकती है। इस काल की अवधि को ज्योतिष सन्दर्भ में दशा कहा गया जिसमे अलग-2 अलग नक्षत्र, राशि व ग्रह अपना प्रभाव दिखाते हैं। इस समय अवधि को विभाजित कर के छोटी समय अवधि ज्ञात की सकती है। इस दशा प्रणाली के आधार पर एक महा दशा को अंतर, प्रत्यंतर, सूक्षम, प्राण एवं देह अन्तर्दशा में विभाजित किया जा सकता है। ज्योतिष शास्त्र में ऋषि मुनियों व विद्वानों द्वारा असंख्य दशा प्रणालियों का वर्णन किया गया है। इन दशाओं की गणना नक्षत्र अथवा राशि के आधार पर की जाती है। वैसे तो विद्वानों के तर्क, अनुभव व स्थान के अनुसार अलग-2 अलग दशा प्रणाली का प्रचलन है लेकिन नक्षत्रों के आधार पर सर्वाधिक प्रचलित दशा प्रणाली विंशोत्री दशा प्रणाली है जिस की दशाओं में सभी ग्रह क्रमानुसार अपनी दशा अवधि में अपना परिणाम देते हैं। इसके अतिरिक्त अष्टोत्रीदशा, योगिनीदशा, नारायणदशा, सुदशा, लग्नकेन्द्रादिदशा, शूलदशा, कालचक्र दशा, द्रिगदशा, चरदशा, स्थिरदशा, त्रिकोणदशा, मूलदशा आदि दशा प्रणालियाँ भी प्रचलन में हैं।

इन सब विभिन्न दशा प्रणालियों में नारायण दशा का विशेष महत्व है। नारायण दशा का वर्णन महाऋषि पराशर: ने राशी दशाओं के कालचक्र के द्वारा व महाजैमिनी ने पदक्रम दशा द्वारा किया है।

किसी भी अन्य दशा में दशाओं की पूर्ण अवधि में एक ही लग्न राशि को आधार मान कर ग्रहों के प्रभाव का विश्लेषण किया जाता है। जिस प्रकार विंशोत्री दशा में कृतिका नक्षत्र से आरम्भ करते हुए सूर्य, चन्द्र, मंगल, राहु, गुरु, शनि, बुध, केतु एवम् शुक्र दशा स्वामी बनते हैं, यह सभी ग्रह अपनी दशा काल में अपना परिणाम देते हैं।

वहीं नारायण दशा पद्धति की विशेषता यह है कि इस प्रणाली में जातक की लग्न राशि बदलती रहती है। इस प्रकार 12 राशियाँ अपनी अपनी दशा अवधि में लग्न की भान्ति ही परिणाम देती है। नारायण दशा के अनुसार जातक का लग्न समय के साथ परिवर्तित होता रहता है इसलिये जो राशि नारायण दशा में उत्पन्न हो उस राशि के भाव को लग्न निर्धारित कर के कुंडली का विश्लेषण करना चाहिए। अत: राशि के भाव को प्रथम भाव मान कर अन्य भावों को उसी क्रमानुसार पुन: स्पष्ट कर लेना चाहिए। कुंडली में स्थित सभी ग्रहों को उनकी ही राशि में रखा जाता है और ग्रहों की जन्म समय की स्थिति भी वैसी ही रहती है केवल ग्रहों का भाव बदल जाता है। इस प्रकार नारायण दशा बदलने पर ग्रहों का परिणाम और प्रभाव भी बदलता रहता है। किसी भी व्यक्ति का जीवन हमेशा एक प्रकार से नहीं चलता और उस में बदलाव होता रहता है। कुछ अवधि के पश्चात् व्यक्ति के जीवन की दिशा और गति में भी परिवर्तन आता है। नारायण दशा विशेष रूप से इस परिवर्तन को स्पष्ट रूप से परिकलित करती है।

ज्योतिष विशेषज्ञ संजय रथ के अनुसार कोई भी दशा प्रणाली विफल हो सकती है अपितु नारायण दशा कभी विफल नही होती। यह दशाओं में सर्वश्रेष्ठ दशा है जिसे उन्होंने दशासम्राट की उपाधि दी है। जो इस दशा प्रणाली को समझ लेता है उसे और किसी प्रणाली की आवश्यकता नही रहती हालाँकि इसे समझ पाना इतना आसन भी नही है।

लग्न के प्रगमन की गणना के अतिरिक्त नारायण दशा की अन्य मुख्य विशेषता है कि प्रत्येक वर्ग कुंडली की नारायण दशा परिकलित की जा सकती है जिस से किसी भी वर्ग से सम्बंधित विषय के फलित परिणाम को ज्ञात किया जा सकता है। जब एक राशि की दशा समाप्त होती है तब दूसरी राशि कार्य करना आरम्भ कर देती है अत: एक ही जातक की 12 लग्न कुंडलियां व वर्गों के अनुसार प्रत्येक वर्ग की भी 12-12 कुंडलियां प्राप्त होती हैं जिससे कुंडली के विश्लेषण और घटना के घटित होने के समय की गणना अधिक सूक्ष्म रूप से की जा सकती है।

वैदिक सॉफ्टवेर जगन्नाथ होरा के रचयिता व लेखक पी. वी. आर. नरसिम्हाराव ने अपनी पुस्तक वैदिक एस्ट्रोलॉजी न इंटीग्रेटेड अप्रोच में वर्गों की नारायण दशा का विस्तार पूर्वक वर्णन किया है।

नारायण दशा अन्य नक्षत्र दशाओं के प्रभाव का विश्लेषण करने में भी सक्षम है। यदि किसी ग्रह की विंशोत्री दशा के पर्यन्त नारायण दशा भी परिवर्तित हो रही हो तो उस ग्रह के भाव में भी परिवर्तन होगा जिस से उस ग्रह का प्रभाव और परिणाम भी प्रभावित होंगे। नारायण दशा द्वारा ग्रहों के गोचर के प्रभाव का अध्ययन भी किया जा सकता है। वर्तमान काल की नारायण दशा राशि को प्रथम भाव मान कर गोचारस्त ग्रहों को उनकी राशि में अलग-अलग भाव में स्थापित कर के व्यक्ति की गोचर कुंडली बनाई जाती है।

नारायण दशा के लेखक व विशेषज्ञ रफल ग्रंदे के अनुसार नारायण दशा व्यक्ति के जीवन में पूर्व निर्धारित परिवेश प्रस्तुत करती है और विंशोत्री दशा व्यक्ति के मन, आत्मा व शरीर द्वारा उस परिवेश में चुने विकल्पों को दर्शाती है।

नारायण दशा की गणना, अवधि व अन्तर्दशा

संजय रथ, पी. वी. आर. नरसिम्हाराव व रफल ग्रंदे द्वारा नारायण दशा की गणना, अवधि व अन्तर्दशा ज्ञात करने की विधि निम्न सूत्रों पर आधारित रहती है।

नारायण दशा की गणना

1. दशा का प्रारम्भ लग्न अथवा सप्तम भाव मे जो अधिक बलवान होता है उस भाव की राशि से होता है (भाव बल के लिये विशेषज्ञों द्वारा बृहत् पराशर होरा शास्त्र व जैमिनी सूत्रों को सन्दर्भ में लिया गया है)। इस राशि को दशा बीज भी कहा जाता है।

2. यदि लग्न बलवान है तो दशा राशि लग्न की राशि को माना जायेगा और दशा लग्न भी वही रहेगा। यदि सप्तम भाव अधिक बलवान है तो सप्तम भाव की राशि को दशा राशि माना जायेगा लेकिन दशा राशि से सप्तम भाव को दशा लग्न मान कर कुंडली का विश्लेषण किया जायेगा।

